परमलघुमञ्जूषा

श्रीमन्नागेशभट्टविरचिता

पर्वतीयनित्यानन्दपन्तेन

टिप्पण्या परिष्कृत्य संशोधिता ।

PARAMALAGHUMANJUSHA,

BY

Śrî Nâgeśa Bhatta,

Edited with notes by

Prvatiya Nityauanda Panta,

PUBLISHED AND SOLD BY
H. D. GUPTA & SONS.

PROPRIETORS,
THE CHOWKHAMBA SANSKRIT BOOK DEPOT;
BENARES CITY.

Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press,
BENARES.

1917.

शुद्धिपत्रम् ।

—:०*०:—

पृ.	प.	अशुद्धम् ।	शुद्धम् ।
६	१४	त्वानरासः	त्वनिरासः
७	१४	भाष्याकारः	भाष्यकारः
९	२०	इतरोतरा	इतरेतरा-
१०	१८	प्रागमेव	प्रागेव-
३६	१९	भिव्याहात्	भिव्याहारात्
३८	१६	विषयाता	विषयता-
४१	१५	तिङ्क्ष्वपि	तिङ्क्ष्वपि-
५३	६	कारिष्ययते	करिष्यते
५७	१३	वाङ्गीरेणैव	वाङ्गीकारेणैव
६१	२०	व्यवस्थिरिति	व्यवस्थितिरिति
६७	८	हेतुद्भावे	हेतुमद्भावे
७८	१०	मत्कार्यामिति	मत्कार्यमिति
७९	१६	घटाका	घटका
८३	७	श्रयत्वं	श्रयस्वं
८४	१२	चेत्रेण	चैत्रेण
८४	१५	घटितत्वत्वा	घटितत्वा
८५	१	प्रवर्तानादि	प्रवर्तनादि
८६	७	सङ्ख्या	सङ्ख्या
८८	१३	रकच्छायाः	कारकेच्छायाः
९०	१७	कर्मत्वत्	कर्मत्वम्
९१	१	ग्रागं	ग्रामं
१००	१	सामप्यी	सामीप्य
१०८	१२	शब्दवात	शब्दवत्

श्रीगणेशाय नमः ।

परमलघुमञ्जूषा

शिवं नत्वा हि नागेशेनानिन्द्या परमा लघुः ॥
वैयाकरणसिद्धान्तमञ्जूषैषा विरच्यते ॥ १ ॥

तत्र वर्णपदवाक्यभेदेन स्फोटस्त्रिधा । तत्रापि जातिव्यक्तिभेदेन पुनः षोढा । अखण्डपदस्फोटोऽखण्डवाक्यस्फोटश्चेति संकलनयाऽष्टौ स्फोटाः । तत्र वाक्यस्फोटो मुख्यः, तस्यैव लोके ऽर्थबोधकत्वात्तेनैवार्थसमाप्तेश्चेति । तदाह न्यायभाष्यकारः—"पदसमूहो वाक्यमर्थसमाप्तौ" इति । अस्य समर्थमिति शेषः । तत्र प्रतिवाक्यं सङ्केतग्रहासम्भवाद् वाक्यान्वाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया पदानि प्रविभज्य पदे प्रकृतिप्रत्ययभागान्प्रविभज्य कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं परिकल्पयन्ति स्माचार्याः ।

तत्र शास्त्रप्रक्रियानिर्वाहको वर्णस्फोटः । प्रकृतिप्रत्ययास्तत्तदर्थवाचका एवेति तदर्थः । उपसर्ग-

निपातधात्वादिविभागोऽपि काल्पनिकः । स्थानिनो लादय आदेशास्तिबादयः कल्पिता एव । तत्र ऋषिभिः स्थानिनां कल्पिता अर्थाः कण्ठरवेणैवोक्ताः । आदेशानां च स्थान्यर्थाभिधानसमर्थस्यैवादेशत्वमितिभाष्यन्यायात्तेऽर्थाः । एवं च स्थानिनां वाचकत्वमादेशानां वेति विचारो निष्फल एव । कल्पितत्वाचकत्वस्योभयत्र सत्त्वात् । मुख्यं वाचकत्वं तु कल्पनया बोधितसमुदायरूपे पदे वाक्ये वा, लोकानां तत एवार्थबोधात् ।

उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः ।

इति न्यायेन व्याकरणभेदेन स्थानिभेदेऽपि न क्षतिर्देशभेदेन लिपिभेदवदिति दिक् ।

तत्र "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति गौतमसूत्रे शब्दश्चाप्तोपदेशरूपः प्रमाणम् । आप्तो नामानुभवेन वस्तुतत्त्वस्य कात्स्न्र्येन निश्चयवान् रागादिवशादपि नान्यथावादी यः स इति चरके पतञ्जलिः ।

तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः । अत एव नागृहीतवृत्तिकस्य शाब्दबोधः । अत एव

च "नहि[1] गुड इत्युक्ते मधुरत्वं प्रकारतया गम्यते" इति समर्थसूत्रभाष्यं सङ्गच्छते । गुडादिशब्देन गुडत्वजात्यवच्छिन्नो गुडपदवाच्य[2] इत्येव बोधो जातिप्रकारकः । मधुरत्वं तु 'गुडो मधुर ऐक्षवत्त्वाद्'इत्यनुमानरूपमानान्तरगम्यम् । विशेष्यविशेषणभावव्यत्यासेन गृहीतशक्तिकस्य पुंसो घटपदाद् घटत्वविशिष्टबोधवारणाय तद्धर्मावच्छिन्नेति । ज्ञाने वृत्तिवैशिष्ट्यं च स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्य-स्वाश्रयपदविषयकत्वोभयसम्बन्धेन बोध्यम् । अतो नागृहीतवृत्तिकस्य, नापि विस्मृतवृत्तिकस्य, नापि तत्पदमजानतो, नापि घटपदादाश्रयत्वेनोपस्थिताकाशस्य, नापि जनकतयोपस्थितचैत्रादेश्च बोधः । संस्कारकल्पिका च वृत्तिस्मृतिरेव शाब्द[3]-

---

१ गुड इत्युक्ते मधुरत्वं प्रकारतया नहि गम्यते इत्यन्वयः ।

२ इदं शब्दस्य बोधविषयत्वाभिप्रायेणोक्तमिति बोध्यम् ।

३ स्मृतेः शाब्दबुद्धिं प्रति न जनकत्वं किन्तु उद्बुद्धसंस्कारस्यैवेति मतमभिप्रेत्येदम् ।
स्पष्टं चेदं संक्षेपशारीरके प्रथमाध्याये अन्विताभिधाननिरूपणावसरे इति तत एवावगन्तव्यम् ।

बुद्धिरेव वेत्यन्यदेतत् ।

सा च वृत्तिस्त्रिधा—शक्तिर्लक्षणा व्यञ्जना च । तत्र शक्तिः कः पदार्थ इति चेत् ।

अत्र तार्किकाः–'अस्माच्छब्दादयमर्थो बोद्धव्यः' इत्याकारा 'इदं पदमिममर्थं बोधयतु'इत्याकारा वेश्वरेच्छा शक्तिः लाघवात् । सैव सङ्केतः सम्बन्धः । शक्तेर्यद्यपि विषयत्वलक्षणः सम्बन्धः पदेऽर्थे बोधे च तथाऽपि बोधनिष्ठजन्यतानिरूपितजनकतावच्चेन शक्तिविषयो वाचकः, पदजन्यबोधविषयत्वेन शक्तिविषयो वाच्य इति नातिप्रसङ्गः । यद्यपि प्रथमं शक्तिग्रहो वाक्य एव तथाऽप्यावापोद्वापाभ्यां शास्त्रकृत्कल्पिताभ्यां तत्तत्पदशक्तिग्रह इत्याहुः ।

तन्न । इच्छायाः सम्बन्धिनोराश्रयतानियामकत्वाभावेन सम्बन्धत्वासम्भवात् । "सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः"इत्यभियुक्तव्यवहारात् । यथा घटवद् भूतलमित्यादौ संयोगरूपः सम्बन्धः सम्बन्धिभ्यां भिन्नो द्विष्ठो घटनिरूपितसंयोगाश्रयो भूतलमितिविशिष्टबुद्धिनियामकश्च, नात्र तथा घटशब्द इच्छावान् तदर्थो वा इच्छावानिति व्यवहारः । तस्मात्पदपदा-

र्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावाप-
रपर्याया । तद्ग्राहकश्चेतरेतराध्यासमूलकं[२] तादात्म्यं

---

१ बोधजनकत्वस्यापि आश्रयतानियामकत्वाभावान्न सम्बन्धत्वम् । नापि तस्य शक्तित्वम् । प्रयोज्यप्रयोजकव्यवहारं पश्यता बालेन प्रयोज्यस्य प्रवृत्त्या तस्य ज्ञानमनुमाय ज्ञानस्योपस्थितत्वाच्छब्दमेव कारणत्वेन गृहीत्वा ऽसम्बद्धस्य कारणत्वानुपपत्तिज्ञानपूर्वकं कल्प्यमानस्य स्वयमनुपपद्यमानत्वेन गृहीतजनकत्वरूपस्य तद्घटितस्य वा ग्रहीतुमनुचितत्वात् । तस्मात् सबन्धान्तरमेव वाच्यवाचकभाव इति लघुमञ्जूषायां स्पष्टम् ।

२ इतरेतराध्यासो मूलं ज्ञापकं यस्येत्यर्थः । तथाहि—शब्दार्थौ परस्परतादात्म्यवन्तौ इतरेतराध्यासवत्त्वात्, यत्र यत्र इतरेतराध्यासस्तत्र तत्र तादात्म्यं यथा गुणगुणिनोः । यत्र न तादात्म्यं न तत्र इतरेतराध्यासः यथा घटपटयोः । गुणगुणिनोश्च इतरेतराध्यासो नीलो घट इत्यादौ प्रत्यक्षादिप्रतीतौ दृष्टः । शब्दार्थयोरितरेतराध्यासोऽपि "शब्दार्थप्रत्ययानामितरेतराध्यासात् सङ्करः" इति पातञ्जलसूत्रे (पा० ३ सू० १७) "गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानम्" इत्यनुभवप्रदर्शनेन भाष्यकारेण स्पष्टीकृतः । रामेति द्व्यक्षरं नामेत्यादिना अग्रे मूलेऽपि स्फुटः । तस्मात् अन्वयव्यतिरेक्यनुमानेन शब्दार्थयोस्तादात्म्यं सिद्धम् ।

तदेव सम्बन्धः । उभयनिरूपितताद्रात्म्यवानुभय

(१) तादात्म्यस्य च सम्बन्धत्वं रूपवान् घटः, जातिमान् पट इत्यादौ आश्रयतावुद्धिनियामकत्वात् प्रसिद्धम् । इदमेव भेदाभेदघटितं नैयायिकैः समवायशब्देन व्यवहियते । तस्यातिरिक्तत्वाङ्गीकारश्च अनवस्थापत्त्यादिदूषणग्रस्तः । ततश्च प्रकृतेऽपि शब्दार्थयोः दीपादिगतशक्तेः दीपालोकसम्बद्धविषयप्रकाशकत्वस्यैव दृष्टत्वेन पदशक्तेरपि पदसंबद्धविषयप्रकाशकत्वसम्भवेन अन्यसम्बन्धे प्रमाणाभावेन पूर्वोक्तानुमानेन च तादात्म्यसम्बन्ध एवाङ्गीक्रियते ।

राहोः शिर इत्यत्र औपाधिकभेदेन षष्ठ्युपपादनपरभाष्यप्रामाण्यात्तु केवलाभेदस्य सम्बन्धत्वं नाङ्गीक्रियते, नतु भेदाभेदघटितस्य तादात्म्यस्य तद्भाष्येण सम्बन्धत्वानरासः । अन्यथा उपाधीभूतशिरश्चैतन्यसमूहस्यापि राहुपदार्थत्वे समूहसमूहिनोरात्यन्तिकभेदस्य कस्यापि मतेऽभावेन समवायाङ्गीकर्तृभिरपि तत्र समवायानङ्गीकारेण अन्यसम्बन्धस्य तत्रासत्त्वेन षष्ठ्युपपादनं भाष्योक्तमसङ्गतमेव स्यात् । तस्माद् भेदाभेदघटितस्य तादात्म्यस्य सम्बन्धत्वं निर्दुष्टम् । तत्र क्वचिद्भेदः काल्पनिकः, अभेदो वास्तवः । यथा गुणगुण्यादौ । क्वचिदभेदः काल्पनिकः भेदो वास्तवः । यथा शब्दार्थयोः । शब्दादेव अर्थसृष्टिरिति पक्षे तु तत्राप्यभेदो वास्तवः भेद एव काल्पनिकः । तत्राभेदस्य उद्भूतत्वविवक्षया "वृद्धिरादैच्" "रामेति द्व्यक्षरं नाम मानभ-

इत्यर्थपदयोर्व्यवहारात् । शक्तेरपि कार्यजनकत्वे सम्बन्धस्यैव नियामकत्वात् । दीपादिगतप्रकाशकत्वशक्तावपि आलोकविषयसम्बन्धे सत्येव वस्तुप्रकाशकत्वं नान्यथेति दृष्टत्वात् ।

तदुक्तं हरिणा,

उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते ।
शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः ॥ इति ।

उपकार उपकार्योपकारकयोर्बोधशक्त्योरुपकारस्वभावः सम्बन्धो यत्रास्ति तत्र धर्मः शक्तिरूपः कार्यं दृष्ट्वा ऽनुमीयते । असौ सम्बन्धः शक्तीनामपि कार्यजनने उपकारकः गुणानामपि द्रव्याश्रितत्वनियामक इति हेलाराजः ।

स सम्बन्धः पदे वाक्ये च । तदाह न्यायभाष्यकारः—"समयज्ञानार्थं चेदं पदलक्षणाया वाचोऽन्वाख्यानं व्याकरणं वाक्यलक्षणाया वाचो ऽर्थलक्षणम्'इति । अनेन पदेष्विव वाक्येष्वपीश्वरसमय

ङ्कः पिनाकिनः" इत्यादिनिर्देशाः । भेदस्योद्भूतत्वविक्षया च "तस्य वाचकः प्रणवः" "उञो वाचकं प्रगृह्यपदम्" इत्यादयः प्रयोगाः । एवं गुणगुण्यादिस्थलेऽप्युदाहार्यमित्यलम् ॥

इति स्पष्टमेवोक्तम् । तस्मादितरेतराध्यासः सङ्केतस्तन्मूलकं तादात्म्यञ्च सम्बन्ध इति सङ्गतार्थः । तदुक्तं पातञ्जलभाष्ये, "सङ्केतस्तु पदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मको योऽयं शब्दः सोऽर्थो योऽर्थः स शब्दः" इति । स्मृत्यात्मक इत्यनेन ज्ञातस्यैव सङ्केतस्य शक्तिबोधकत्वं दर्शितम् ।

---

१ स्मृतौ आत्मा स्वरूपं यस्येत्यर्थः । स्मर्यमाण इति यावत् ॥

२ शक्तिबोधकत्वमिति । अयं भावः—प्रत्यक्षतो दृश्यमाने एव घटे "कोऽयम्" इति "किंनाम्नको ऽयम्" इति वा प्रश्ने "घटोऽयम्" इत्युपदेशेन "वृद्धिरादैच्" इत्याद्युपदेशेन च घटं घटपदाभिन्नत्वेन आदैचश्च वृद्धिपदाभिन्नत्वेनावगच्छति । तदभिन्नत्वं च तदात्मकत्वम् । तदात्मकत्वग्रहे च तत्र बोधात्मकघटाद्यभिव्यक्तिशक्तिं गृह्णाति, घटादौ मृदाद्यात्मकत्वग्रहे मृदादौ प्रत्यक्षात्मकघटाद्यभिव्यक्तिशक्तिमिव । अथ प्रयोगादिना पदज्ञाने जाते शक्तिविषयकसंस्कारोद्बोधे च शाब्दबोधो जायते । स्वशक्त्या स्वसम्बद्धस्यैवाभिव्यक्तिदर्शनाद् घटादिपदशक्त्या घटादिपदसम्बद्धस्यैव घटादेः शाब्दबोधरूपाभिव्यक्तिर्वाक्या । ततश्च पूर्वोक्तरीत्या तादात्म्यसम्बन्धसिद्धिः ।

यत्रापि घटपदं घटस्य वाचकं प्रगृह्यपदम् उओ

वाचकम् इत्युपदेशः, तत्रापि अभेदसहचरितस्यैव भेदस्य ग्रहो भवति, नतु शुद्धभेदस्य ग्रहः । शुद्धभेदग्रहे शक्तिग्रहानुपपत्तेः । पटादिप्रतियोगिकशुद्धभेदवत्त्वेन गृहीते मृदादौ पटादिशक्तिग्रहस्य अजननात् । निमित्तेऽतिप्रसङ्गस्तु न शङ्क्यः । उपदाने एव शक्तिस्वीकारात् । स्फोटात्मकशब्दादेव सृष्टिरिति पक्षमाश्रित्य शब्दे अर्थोपादानत्वस्य सुवचत्वात् । बौद्धस्यैवार्थस्य शाब्दबोधविषयत्वमिति पक्षे सुतरां तत्संभवाच्च । दृष्टिसृष्टिवादे शङ्काया एवानुत्थानाच्च । एवं च व्यवहारादेरपि शक्त्यनुमानम् इतरेतराध्यासात्मकसङ्केतानुमानपूर्वकमेव । इतरेतराध्यासात्मकसङ्केतश्च "योऽर्थः स शब्दः यः शब्दः सोऽर्थः" इत्याकारक ईश्वरकृतः वाच्यवाचकभावरूपां शक्तिं ग्राहयति । तदुक्तं पातञ्जलभाष्ये "तस्य वाचकः प्रणवः" इति सूत्रे (पा० १ सू० २७) "स्थितोऽस्य वाच्यस्य वाचकेन सम्बन्धः । सङ्केतस्तु ईश्वरस्य स्थितमेवार्थमभिनयति । यथाऽवस्थितः पितापुत्रयोः सम्बन्धः सङ्केतेनाद्योत्यते, अयमस्य पिता अयमस्य पुत्र इति" इति । अनेन च ईश्वरसङ्केतस्य शक्तिग्राहकत्वं स्पष्टमेवोक्तम् । उपदेशरूपस्य पूर्वोक्तसङ्केतस्य इतरेतराध्यासोल्लेखित्वात्तादात्म्यग्रहपूर्वकशक्तिग्रहजनकत्वं तस्य दर्शितम् । एतेन नैयायिकोक्तम् ईश्वरसंकेतस्य शक्तित्वं निराकृतं वेदितव्यम् । यथा घटशब्दो घटस्य वाचक इत्युपदेशरूपः संकेतः शक्तितो भिन्नः तथैव महर्षीणां साक्षाद् ईश्वरकर्तृकः तादृश उपदेशः शक्तितो भिन्न एव वाच्यः । दृष्टानुसारेणैव कल्पनाया

उक्त ईश्वरसङ्केत एव शक्तिरिति नैयायिकमतं न युक्तम् । 'अयमेतच्छक्यः,''अत्रास्य शक्तिः'इत्यस्य सङ्केतस्य शक्तितः पार्थक्येन प्रसिद्धत्वात् । अत एव न्यायवाचस्पत्ये उक्तम्–सर्गादिष्वां महर्षिदेवतानामीश्वरेण साक्षादेव कृतः सङ्केतस्तद्व्यवहाराच्चास्मदादीनामपि सुग्रहस्तत्सङ्केतः' इति ।

तस्य च तादात्म्यस्य निरूपकत्वेन विवक्षितो ऽर्थः शक्यः, आश्रयत्वेन विवक्षितः शब्दः, शक्त इत्युच्यते । शब्दार्थयोस्तादात्म्यादेव 'श्लोकमशृणोदथार्थं शृणोति अर्थं वदति'इत्यादिव्यवहारः । "ओमित्येकाक्षरं ब्रह्म"

"रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः",

"वृद्धिरादैच्" इतिशक्तिग्राहकश्रुतिस्मृतिविषये सामानाधिकरण्येन प्रयोगश्च ।

तादात्म्यं च तद्भिन्नत्वे सति तदभेदेन प्रती-

उचितत्वात् । उक्तंच नागेशेन "अयमेतच्छक्यो ऽत्रास्य शक्तिरित्यस्य संकेतस्य शक्तितः पार्थक्येन प्रसिद्धत्वात्" इति । इच्छारूपसंकेतस्य शक्तित्वं तु प्रागमेव निरस्तम् । तस्मात् इन्द्रियशक्तिवत् पदशक्तिरपि भिन्नैव तद्ग्राहकं च इतरेतराध्याससिद्धं तादात्म्यमिति सर्वं सुस्थम् ।

यमानत्वमिति भेदाभेदसमनियतम् । अभेदस्याध्यस्तत्वाच्च न तयोर्विरोधः ।

यत्तु तार्किकाः, शब्दार्थयोस्तादात्म्यस्वीकारे मधुशब्दोच्चारणे मुखे माधुर्यरसास्वादापत्तिः, वह्निशब्दोच्चारणे मुखे दाहापत्तिरित्याहुः । तन्न । भेदाभेदस्योपपादितत्वात् । वस्तुतो बौद्ध एवार्थः शक्यः, पदमपि स्फाटोत्मकं प्रसिद्धम्, तयोस्तादात्म्यम् । तत्र बौद्धे वह्न्यादावर्थे दाहादिशक्तिमत्त्वाभावात् । अत एव "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" इति विकल्पसूत्रं सङ्गच्छते । शब्दज्ञानमात्रेणानुपाती बुद्धावनुपतनशीलो वस्तुशून्यः बाह्यार्थरहितः विशेषेण कल्प्यतइति विकल्पः, बुद्धिपरिकल्पित इति तदर्थः । अत एव—

एष वन्ध्यासुतो याति खपुष्पकृतशेखरः ।
कूर्मक्षीरचये स्नातः शशशृङ्गधनुर्धरः ॥

इत्यत्र वन्ध्यासुतादीनां बाह्यार्थशून्यत्वेऽपि बुद्धिपरिकल्पितं वन्ध्यासुतशब्दवाच्यार्थमादायार्थवत्त्वात्प्रातिपदिकत्वम् । अन्यथाऽर्थवत्त्वाभावेन प्रातिपदिकत्वाभावात्स्वाद्युत्पत्तिर्न स्यात् । यत्तु शशशृङ्गमित्यत्र शृङ्गे शशीयत्वभ्रम इति तार्किकैरुक्तम् । तन्न । शशशब्दवाच्यजन्तुदर्शनरूपबाधे सति

शशशृङ्गं नास्तीति वाक्ये शशशृङ्गमित्यस्य प्रातिपदिकत्वानापत्तेः । अर्थपदयोस्तादात्म्यात्तत्तदर्थतादात्म्यापन्नः शब्दो भिन्न इति हेतोरर्थभेदाच्छब्दभेद इति व्यवहारः । समानाकारमात्रेण तु एकोऽयं शब्दो बहर्थ इति व्यवहारः । सा च शक्तिस्साधुष्विवापभ्रंशेष्वपि, शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वात् । व्यवहारदर्शनेन च पूर्वजन्मानुभूतशक्तिस्मरणम् । अत एव बालानां तिरश्चां चान्वयबोधः । न हि तेषां तदैव तत्सम्भवः ।

यत्तु तार्किकाः—असाधुशब्देन साधुस्मरणद्वारा-ऽर्थबोध इत्याहुः । तन्न । साधुस्मरणं विनाऽपि बोधानुभवात् । तद्वाचकसाधुशब्दमजानतां बोधानापत्तेश्च । न च शक्तिभ्रमाद् बोधो ऽसाधुशब्देष्विति वाच्यम् । निस्सन्देहप्रत्ययस्य बाधकं विना भ्रमत्वायोगात् । अत एव स्त्रीशूद्रबालादीनामुच्चरिते साधावर्थसंशये तदपभ्रंशेनार्थनिर्णयः । अत एव "समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः" इति भाष्यम्,

वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः ।

इति हरिकारिका च सङ्गच्छते । अत एवार्यम्लेच्छाधिकरणं सङ्गच्छते । तत्र हि यद्यपि आर्या

यवशब्दं दीर्घशूके प्रयुञ्जते, म्लेच्छास्तु प्रियङ्गौ प्रयुञ्जते, तमेव च बुध्यन्ते, तयाऽप्यार्यप्रसिद्धेर्बलवत्त्वाद् वेदे दीर्घशूकपरतैवेति सिद्धान्तितम् । तव तु म्लेच्छबोधस्य शक्तिभ्रममूलकत्वेन भ्रान्तिविषयरजतज्ञानस्येव म्लेच्छप्रसिद्धेर्वस्त्वसाधकतयाऽऽर्यम्लेच्छप्रसिद्ध्योः कस्या बलवत्त्वमितिविचारासङ्गतिः स्पष्टैव । साधुत्वं च व्याकरणान्वाख्येयत्वं पुण्यजनकतावच्छेदकधर्मवत्त्वं वा । तद्भिन्नत्वमसाधुत्वम् ।

सा च शक्तिस्त्रिधा, रूढियोगो योगरूढिश्च । शास्त्रकल्पितावयवार्थभानाभावे समुदायार्थनिरूपितशक्ती रूढिः, यथा मणिनूपुरादौ । शास्त्रकल्पितावयवार्थनिरूपिता शक्तिर्योगः, यथा पाचकादौ । शास्त्रकल्पितावयवार्थान्वितविशेष्यभूतार्थनिरूपिता शक्तिर्योगरूढिः, यथा पङ्कजपदे । तत्र पङ्कजानिकर्तृ पद्ममिति बोधात् । पद्मेऽनुपपत्तिप्रतिसन्धानं सम्बन्धप्रतिसन्धानं च विना न लक्षणावसरः । क्व चित् तात्पर्यग्राहकवशात्केवलरूढ्यर्थस्य केवलयोगार्थस्य च बोधः, भूमौ पङ्कजमुत्पन्नं कल्हारकैरवमुखेष्वपि पङ्कजेष्वित्यादौ । स्पष्टं चेदम् "आर्हाद्" इतिसूत्रे भाष्ये । अश्वगन्धादिपदमोषधिविशेषे रूढम्, अश्वसम्ब-

न्धिगन्धवत्तया वाजिशालाबोधे यौगिकम् । इदं यौगिकरूढमित्युच्यते । एवं मण्डपपदं गृहविशेषे रूढं, मण्डपानकर्त्तरि यौगिकम् ।

सैषा शक्तिः संयोगादिभिर्नानार्थेषु नियम्यते ।

तदुक्तं हरिणा—

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥ इति ।

एते संयोगादयो नानार्थेषु शब्देषु शब्दार्थस्यानवच्छेदे सन्देहे तदपाकरणद्वारा विशेषार्थनिर्णायका इति तदर्थः । संयोगविप्रयोगयोरुदाहरणे सवत्सा धेनुरवत्सा धेनुरिति[1]। साहचर्यस्य रामलक्ष्मणाविति । साहचर्यं सादृश्यं सदृशयोरेव सहप्रयोग इति नियमात् । रामार्जुनगतिस्तयोरित्यादौ विरोधेन तत् । अञ्जलिना जुहोति अञ्जलिना सूर्यमुपतिष्ठत इत्यत्र जुहोतीत्यादिपदार्थवशाद् अञ्जलिपदस्य तत्तदाकाराञ्जलिपरत्वम् । सैन्धवमानयेत्यादौ प्रकरणेन तत् । "अक्ताः शर्करा उपदधाति" इत्यादौ "तेजो वै घृतम्"

१ सवत्सा इत्युक्ते धेनुरेव प्रतीयते इत्यर्थः ।
२ मृत्तिकामिश्राः क्षुद्रपाषाणाः शर्कराः ।

इति घृतस्तुतिरूपाल्लिङ्गादक्ता इत्यस्य घृतसाधनकाञ्जनपरत्वम् । रामो जामदग्न्य इति जामदग्न्यपदसन्निधानाद्रामः परशुरामः । अभिरूपाय कन्या देया इत्यादौ अभिरूपतरायेति सामर्थ्यात् प्रतीयते ।

यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा ।
यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः ॥

इत्यत्रौचित्यात् परशुनेत्यस्य छेदनार्थत्वम्, मधुसर्पिषा इत्यस्य सेचनार्थत्वम्, गन्धमाल्याद्यैरित्यस्य पूजनार्थत्वम् । भात्यत्र परमेश्वर इत्यत्र राजधानीरूपदेशात्परमेश्वरपदं राजबोधकम् । चित्रभानुर्भातीत्यादौ रात्रावग्नौ दिवा सूर्ये । व्यक्तिर्लिङ्गम् । मित्रो भाति मित्रं भातीत्यादावादौ सूर्योऽन्त्ये सुहृत् । स्थूलपृषतीमित्यादौ स्वरात्तत्पुरुषबहुव्रीह्यर्थनिर्णयः ॥

इति शक्तिनिरूपणम् ॥

ननु लक्षणा कः पदार्थ इति चेत्,
अत्र तार्किकाः—
स्वशक्यसम्बन्धो लक्षणा । सा च द्विधा । गौणी

१ अप्रिय इत्यर्थः । कटुशब्द इत्यादाविव कटुशब्दोऽप्रियार्थकः । अन्यथा निघण्टूवादौ तस्य तीक्ष्णरसमरीचशुण्ठीपिप्पल्याद्यर्थकत्वेन दृष्टत्वात् तस्य च निम्बेऽभावादसङ्गतिः स्पष्टैवेति बोध्यम् ।

शुद्धा च । स्वनिरूपितसादृश्याधिकरणत्वसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका गौणी । तदतिरिक्तसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका शुद्धा । प्रकारान्तरेणापि सा द्विविधा । अजहत्स्वार्था जहत्स्वार्था च । स्वार्थसंवलितपरार्थाभिधायिका ऽजहत्स्वार्था । तेन छत्रिणो यान्ति, कुन्तान् प्रवेशय, यष्टीः प्रवेशय, काकेभ्यो दधि रक्ष्यतामित्यादौ छत्रिसहितसेना—कुन्तास्त्रसहितपुरुष—यष्टिसहितपुरुष—काकसहितसर्वदध्युपघातकबोधः । स्वार्थपरित्यागेनेतरार्थाभिधायिकाऽन्त्या । तत्परित्यागश्च शक्यार्थस्य लक्ष्यार्थान्वयिना ऽनन्वयित्वम् । तेन गां वाहीकं पाठयेत्यादौ गोसदृशलक्षणायामपि न गोस्तदन्वयिपाठनक्रियान्वयित्वम् । साच लक्षणा तात्स्थ्यादिनिमित्तिका । तदाह,

तात्स्थ्यात्तथैव ताद्धर्म्यात्तत्सामीप्यात्तथैव च ।
तत्साहचर्यात्तादर्थ्याज् ज्ञेया वै लक्षणा बुधैः ॥ इति ।

तात्स्थ्यान्मञ्चा हसन्ति ग्रामः पलायितः । ताद्धर्म्यात्सिंहो माणवकः, गौर्वाहीकः । तत्सामीप्याद्गङ्गायां घोषः । तत्साहचर्याद्यष्टीः प्रवेशय । तादर्थ्यादिन्द्रार्था स्थूणा इन्द्रः । अन्वयाद्यनुपपत्तिप्रति-

सन्धानञ्च लक्षणाबीजम्[1] । वस्तुतस्तु तात्पर्यानुपपत्तिप्रतिसन्धानमेव तद्बीजम् । अन्यथा गङ्गायां घोष इत्यादौ घोषादिपदे एव मकारादिलक्षणापत्तिस्तावताऽप्यन्वयानुपपत्तिपरिहारात् । गङ्गायां पापी गच्छतीत्यादौ गङ्गापदस्य नरके लक्षणापत्तेश्च । अस्माकं तु भूतपूर्वपापावच्छिन्नलक्षकत्वे तात्पर्यान्न दोषः । "नक्षत्रं दृष्ट्वा वाचं विसृजेद्"इत्यत्रान्वयसम्भवेऽपि तात्पर्यानुपपत्त्यैव लक्षणास्वीकारात् । एकानुगमकस्वीकारेण निर्वाहे ऽनेकानुगमकस्वीकारे गौरवाच्च । विशिष्टार्थबोधकशब्दस्य पदार्थैकदेशे लक्षणायां जहदजहल्लक्षणेति व्यवहरन्ति वृद्धाः । वाक्यार्थे किञ्चिदंशत्यागः किञ्चिदंशपरिग्रहश्च । अत्र ग्रामैकदेशे पटैकदेशे च दग्धे ग्रामो दग्धः पटो दग्ध इति व्य-

---

१ लक्षणायाः शक्यसम्बन्धस्य बीजं ज्ञापकमित्यर्थः । तथाहि—गङ्गायां घोष इत्यादौ प्रवाहादिरूपशक्यार्थोपस्थितौ तत्र अन्वययोग्यत्वादिना तात्पर्यविषयत्वाभावे ज्ञाते गङ्गापदादेः प्रवाहादिसम्बन्धित्वेनोपस्थिततीरादिना स्वशक्यसम्बन्धरूपः सम्बन्धो गृह्यते "तीरं गङ्गापदशक्यसम्बन्धि" इति । अनन्तरं तदुपस्थितौ अन्वययोग्यत्वादिना तत्र तात्पर्यविषयत्वे निश्चिते तद्विषयकः शाब्दबोधो जायते इति ।

वहारः । "तत्त्वमसि" इत्यत्र सर्वज्ञत्वाल्पज्ञत्वयोस्त्याग शुद्धचैतन्ययोरभेदान्वयः ।

स्वबोध्यसम्बन्धो लक्षणेति के चित् । गभीरायां नद्यां घोष इत्याद्यनुरोधात् । तथाहि–न तावद् गभीरपदं तीरलक्षकं, नद्यामित्यनन्वयापत्तेः नहि तीरं नदी । अत एव न नदीपदेऽपि । गभीरपदार्थानन्वयात् । न हि तीरं गभीरम् । न च प्रत्येकं पदद्वये सा, विशिष्टनदीबोधानापत्तेः । तस्मात्समुदायबोध्यगभीरत्वविशिष्टनदीपदार्थः, तत्सम्बन्धो लक्षणेति । द्विरेफपदस्य स्वलक्ष्यभ्रमरशब्दवाच्यार्थे लक्षणायां लाक्षेतलक्षणेति व्यवहारः । स्वबोध्यपदवाच्यत्वं सम्बन्धः ।

प्रकारान्तरेण पुनर्लक्षणा द्विविधा । तथा हि–

प्रयोजनवती रूढा लक्षणा द्विविधा मता । इति ।

असति प्रयोजने शक्यसम्बन्धो निरूढलक्षणा । त्वचा ज्ञातमित्यादौ यथा त्वचस्त्वगिन्द्रिये । इयं तु शक्त्यपरपर्यायैवेति बोध्यम् । गङ्गायां घोष इत्यत्र तीरे गङ्गागतशैत्यपावनत्वादिप्रतीतिः प्रयोजनम् । गौर्वाहीक इत्यत्र सादृश्यं लक्ष्यतावच्छेदकं गवाभेदप्रत्ययः प्रयोजनम् । कुन्ताः प्रविशन्तीति भीतिपला-

यमानवाक्ये कुन्तविशिष्टपुरुषे कुन्तगततैक्ष्ण्यप्रतीतिः प्रयोजनमित्याहुः ।

तन्न । सति तात्पर्ये सर्वे सर्वार्थवाचका इति भाष्यात्तल्लक्षणाया अभावात् । वृत्तिद्वयावच्छेदकद्वयकल्पने गौरवात् । जघन्यवृत्तिकल्पनाया अन्याय्यत्वाच्च । कथं तर्हि गङ्गादिपदात्तीरप्रत्ययः ।

१ अयं भावः—प्रवाहादिसम्बन्धित्वेनोपस्थिततीरादौ गङ्गापदादेः "सर्वे सर्वार्थवाचकाः" इति भाष्यात् सामान्यतः पूर्वमेव ज्ञातः शक्तिरूपः सम्बन्ध एव कल्पनीयो, न तु शक्यसम्बन्धरूपः । तथा सति तयोरुभयोः शाब्दबोधजनकपदार्थोपस्थितिजनकपदपदार्थसम्बन्धत्वरूपं शाब्दबोधजनकपदपदार्थसम्बन्धत्वरूपं वा वृत्तित्वं कल्पनीयम्, शाब्दबोधकारणतावच्छेदकत्वम् उपस्थितिकारणतावच्छेदकत्वं च शक्तित्वशक्यसम्बन्धत्वयोरुभयोः कल्पनीयम्, इति गौरवम् । शक्तिकल्पनापक्षे तु तस्या एव वृत्तित्वकल्पनं, तत्त्वस्यैवच तत्तद्वच्छेदकत्वकल्पनमिति लाघवम् । तन्मते अन्यदपि गौरवं भूषणादौ स्पष्टं प्रतिपादितं तत् तत एवावगन्तव्यम् । व्यवहारादिना गङ्गापदादौ तीरादिशक्तेः पूर्वं विशेषरूपेणाग्रहणे अप्रसिद्धात्वाद् लक्षणापदेन व्यवहार इति बोध्यम् ।

२ अन्याय्यत्वादिति । पूर्वोपस्थितशक्तिसम्बन्धस्य वृत्तित्वकल्पनमुपेक्ष्य पश्चादुपस्थिततद्घटितसम्बन्धस्य

भ्रान्तोऽसि, सति तात्पर्ये सर्वे सर्वार्थवाचका इति भाष्यमेव गृहाण । तथाहि—शक्तिर्द्विविधा—प्रसिद्धाऽप्रसिद्धा च । आमन्दबुद्धिवेद्यात्वं प्रसिद्धात्वम् । सहृदयहृदयमात्रवेद्यात्वमप्रसिद्धात्वम् । तत्र गङ्गादिपदानां प्रवाहादौ प्रसिद्धा शक्तिः, तीरादौचाप्रसिद्धेति किमनुपपन्नम् । ननु सर्वे सर्वार्थवाचका इति चेद् ब्रूषे तर्हि घटपदात्पटप्रत्ययः किन्न स्यादिति चेन्न । सति तात्पर्ये इत्युक्तत्वात्तात्पर्याभावादिति गृहाण । तात्पर्यं चात्र ऐश्वरं देवतामहर्षिलोकबृद्धपरम्परातोऽस्मदादिभिर्लब्धमिति सर्वं सुरूढम् ।

ननु व्यञ्जना कः पदार्थः ?। उच्यते । मुख्यार्थबाधनिरपेक्षं बोधजनको मुख्यार्थसम्बन्धासम्बन्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना । अत एव निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यता च हर्यादिभिरुक्ता । द्योतकत्वं च स्वसमभिव्याहृतपदानिष्ठशक्तिव्यञ्जकत्वमिति । वैयाकरणानामप्येतत्स्वीकार आवश्यकः । एषा च शब्दतदर्थपदपदैकदेशवर्णरचनाचेष्टादिषु सर्वत्र, तथैवानुभवात् । वक्त्रा-

वृत्तित्वकल्पनाया अनुचितत्वादित्यर्थः ।

दि[1] वैशिष्ट्यज्ञानं च व्यङ्ग्यविशेषबोधे सहकारीति न सर्वत्र तदपेक्षेत्यन्यत्र विस्तरः ।

यत्तु तार्किकाः लक्षणयैव गतार्था व्यञ्जनेति न सा स्वीकार्येत्याहुः ।

तन्न । लक्षणाया मुख्यार्थबाधपूर्वकलक्ष्यार्थबोधकत्वात् । मुख्यार्थसम्बद्धार्थस्यैव लक्षणाया बोधकत्वात् व्यञ्जनाया अतथात्वेन तदनन्तर्भावाच्चेति दिक् ॥

ननु कोऽयं वृत्त्याश्रयश्शब्दः । वर्णाः प्रत्येकमिति चेद्, न । द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तेः । नापि वर्णसङ्घातः । उच्चरितप्रध्वंसित्वेन यौगपद्यासम्भवात् । अभिव्यक्तेरुत्पत्तेर्वा क्षणस्थायित्वात्क्षणात्मककालस्य प्रत्यक्षायोग्यत्वेन तदवच्छिन्नवर्णस्याप्यप्रत्यक्षत्वात् । उच्चारणाधिकरणकालोत्तरका-

---

१ वक्त्रादयश्च वक्तृबोद्धव्यकाकुवाक्यवाच्यान्यसन्निधिदेशकालप्रस्तावचेष्टादयः । प्रस्तावः प्रकरणम्, इतरे प्रायः प्रसिद्धाः । ते चेमेऽर्थशक्तिमूलव्यञ्जनयाऽर्थावबोधे सहकारिण इति केचित् । अपरे तु शब्दशक्तिमूलव्यञ्जनास्थलेऽप्येषां सहकारिता । अत एव शालकादिना प्रयुक्ते 'सुरभिमांसं भवान् भुङ्क्ते' इति वाक्येऽश्लीलार्थान्तरप्रतीतिः, नतु गुर्वादिप्रयुक्ते इत्याद्यन्यत्र–विस्तरः ।

लट्टत्तिध्वंसप्रतियोगित्वमुच्चरितप्रध्वंसित्वम् । इको यणचि"इत्यादौ तस्मिन्निति परिभाषोपस्कृतवाक्यार्थेऽयं पूर्वोऽयं पर इति नष्टस्य प्रत्यक्षविषयेदंशब्देन पौर्वापर्यव्यवहारायोगाच्च ।

यत्तु तार्किकाः–वर्णानामनित्यत्वेऽपि उत्तरोत्तरवर्णे पूर्वपूर्ववर्णवत्त्वमव्यवहितोत्तरत्वसम्बन्धेन संस्कारवशाद् गृह्यते इति पदस्य प्रत्यक्षत्वाच्छाब्दबोधः । यद्वा पूर्वपूर्ववर्णजाः शब्दाः शब्दजशब्दन्यायेन चरमवर्णप्रत्यक्षपर्यन्तं जायमाना एव सन्तीति न पदप्रत्यक्षानुपपत्तिः । यद्वा पूर्वपूर्ववर्णानुभवजन्यसंस्कारसध्रीचीनचरमवर्णानुभवतः शाब्दबोध इत्याहुः ॥

तन्न । आद्येऽयं पूर्वोऽयं पर इत्याभिलापासम्भवेन अव्यवहितोत्तरत्वसम्बन्धायोगात् । नष्टविद्यमानयोरव्यवहितोत्तरत्वसम्बन्धस्य वक्तुमशक्यत्वाच्च । द्वितीये शब्दजशब्दन्यायेन पदप्रत्यक्षोपपादनेऽपि पदस्याविद्यमानत्वेन तत्र शक्त्याश्रयत्वस्य ग्रहानुपपत्तेः । अविद्यमाने आश्रयत्वाङ्गीकारे नष्टो घटो जलवानित्याद्यापत्तेश्च । तृतीये येन क्रमेणानुभवस्तेनैव क्रमेण तत्संस्कारस्थितिरित्यत्र विनिगमकाभावात् सरो रसो नदी दीन इत्यादौ विपरीत-

संस्कारोद्बोधेन प्रत्येकमन्यार्थप्रत्ययापत्तेः । उत्पत्ति-विनाशवद्वर्णसमुदायरूपपदस्य मनुष्यादिवद्भेदे "एक इन्द्रशब्दः क्रतुशते प्रादुर्भूतो युगपत्सर्वयागेष्वङ्गं भवति" इतिभाष्यविरोधापत्तेश्च । प्रादुर्भूतोऽभिव्यक्तः । ननु कस्तर्हि वृत्त्याश्रयश्शब्दः । स स्फोटात्मक इति गृहाण ॥

ननु कोऽयं स्फोटः ? । उच्यते । चतुर्विधा हि वागस्ति—परा पश्यन्ती मध्यमा वैखरी च । तत्र मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परा वागुच्यते । नाभि-पर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता मनोगोचरी-भूता पश्यन्ती वागुच्यते । एतद् द्वयं वाग्ब्रह्म योगिनां समाधौ निर्विकल्पकसविल्पकज्ञानविषय इत्युच्यते । ततो हृदयपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता त-त्तदर्थवाचकशब्दस्फोटरूपा श्रोत्रग्रहणायोग्यत्वेन सू-क्ष्मा जपादौ बुद्धिनिर्ग्राह्या मध्यमा वागुच्यते । तत आस्यपर्यन्तमागच्छता तेन वायुनोर्ध्वमाक्रामता च मूर्धानमाहत्य पराहत्य च तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्राह्या वैखरी वागुच्यते । तदाह—

परा वाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥ इति ।

वैखर्या हि कृतो नादः परश्रवणगोचरः ।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते ॥

इति च ।

युगपदेव मध्यमावैखरीभ्यां नाद उत्पद्यते । तत्र मध्यमानादोऽर्थवाचकस्फोटात्मकशब्दव्यञ्जकः । वैखरीनादो ध्वनिः सकलजनश्रोत्रमात्रग्राह्यो भेर्यादिनादवाच्यरर्थकः । मध्यमानादश्च सूक्ष्मतरः कर्णपिधाने जपादौ च सूक्ष्मतरवायुव्यङ्ग्यः शब्दब्रह्मरूपस्फोटव्यञ्जकश्च । तादृशमध्यमानादव्यङ्ग्यः शब्दः स्फोटात्मको ब्रह्मरूपो नित्यश्च ।

तदाह हरिः,

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ इति ।

स च यद्यप्येकोऽखण्डश्च, तथाऽपि पदं वाक्यं जपाकुसुमादिलौहित्यपीतत्वादिव्यञ्जकोपरागवशाद् लोहितः पीतः स्फाटिक इति भानवद् वर्णादिव्यङ्ग्यः वर्णरूपः पदरूपो वाक्यरूपश्च । यथा च मुखे मणिकृपाणदर्पणव्यञ्जकोपाधिवशाद्दैर्घ्यवर्तुलत्वादिभानं तद्वत् । तदुक्तम्,

पदं न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।

वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ॥ इति ।

किञ्च । व्यञ्जकध्वनिगतं कत्वगत्वादिकं स्फोटे भासते । बिम्बगतधर्मवैशिष्ट्येनैव प्रतिबिम्बस्य लोकेऽवधारणात् । व्यञ्जकरूषितस्यैव स्फटिकादेर्भानाच्च । यथा चैकस्याकाशस्य घटाकाशो महाकाश इत्यौपाधिको भेदः, यथा चैकस्यैव चेतनस्यौपाधिको जीवेश्वरभेदो जीवानां च परस्परं भेदः, एवं स्फोटे व्यञ्जकध्वनिगतकत्वादिभानात्ककारो बुद्ध इत्यौपाधिको भेदव्यवहारः । औपाधिको भेद इत्यत्रोपाधिः घट–कत्वादिर्भिन्न उपधेयस्तु आकाशस्फोटादिरेक एवेति तात्पर्यम् । पदवाक्ययोस्सखण्डत्वपक्षे त्वन्तिमवर्णव्यङ्ग्यः स्फोट एक एव । पूर्वपूर्ववर्णस्तु तात्पर्यग्राहकः । न्यायनये चित्रगुरित्यादौ चित्रादिपदवत् ॥

ध्वनिस्तु द्विविधः । प्राकृतो वैकृतश्च । प्रकृत्याऽर्थबोधनेच्छया स्वभावेन वा जातः स्फोटव्यञ्जकः प्रथमः प्राकृतः । तस्मात्प्राकृताज्जातो विकृतिविशिष्टश्चिरस्थायी निवर्तको वैकृतिकः ।

हरिरप्याह,

स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते ।

शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः ॥

ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते। इति।

शब्दस्याभिव्यक्तेरूर्ध्वं, वैकृता ध्वनयो जायन्ते इति शेषः। वृत्तिभेद इति।

अभ्यासार्थे द्रुता वृत्तिर्मध्या वै चिन्तने स्मृता।

शिष्याणामुपदेशार्थं वृत्तिरिष्टा विलम्बिता ॥ इति—

तिसृषु वृत्तिषु समुपोहन्ते कारणानि भवन्ति स्फोटस्तु तैर्न भिद्यत इति तदर्थः।

अत्रेदं बोध्यम्—केनचिद् घटमानयेति वैखरीनादः प्रयुक्तः, स केनचिच्छोत्रेन्द्रियेण गृहीतः, स नाद इन्द्रियद्वारा बुद्धिहृद्गतस्सन्नर्थबोधकं शब्दं स्वनिष्ठकत्वादिना व्यञ्जयति तस्मादर्थबोधः। स्फुटत्यर्थोऽस्मादिति व्युत्पत्त्या स्फोटः। उच्चारयितुस्तु युगपदेव मध्यमावैखरीभ्यां नाद उत्पद्यते। तत्र वैखरीनादो वह्नेः फूत्कारादिवन्मध्यमानादोत्साहकः, मध्यमानादः स्फोटं व्यञ्जयतीति शीघ्रमेव ततोऽर्थबोधः। परस्य विलम्बेनानुभवसिद्धत्वात्। अतएव श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्द इत्याकरग्रन्थस्संगच्छते। कत्वादिना श्रोत्रोपलब्धित्वं स्फोटात्मकपदादिरूपेण तु बुद्धिनिर्ग्राह्यत्वम्, स च

प्रयोगेण वैखरीरूपेणाभिव्यक्तिः स्वरूपरूपितः कृत इति तदर्थः । तत्रापि शक्यत्वस्येव शक्ततावच्छेदिकाया वर्णपदवाक्यनिष्ठजातेर्वाचकत्वम् । तदुक्तम्,

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृतेति।

तस्मादष्टविधस्फोटात्मकशब्दो वृत्त्याश्रयः । वस्तुतस्तु वाक्यस्फोटो वाक्यजातिस्फोट एव वा वृत्त्याश्रयः । तत एव लोकेऽर्थबोध इत्याद्युक्तत्वादिति सर्वं सुस्थम् । इति स्फोटनिरूपणम् ॥

अथ शाब्दबोधसहकारिकारणानि[1] आकाङ्क्षायोग्यतासत्तितात्पर्याणि । वाक्यसमयग्राहिकाऽऽकाङ्क्षा । साचैकपदार्थज्ञाने तदर्थान्वययोग्यार्थस्यज्ञानं तद्विषयेच्छा "अस्यान्वय्यर्थः कः" इत्येवंरूपा पुरुषनिष्ठैव, तथापि तस्याः स्वविषयेऽर्थे आरोपः। अयमर्थोऽर्थान्तरमाकाङ्क्षति इति व्यवहारात् । इदमेवाभिधानापर्यवसानमित्युच्यते । पदे तु नारोपः, अर्थबोधोत्तरमेवाकाङ्क्षोदयात् । पदं साकाङ्क्षमिति तु साकाङ्क्षार्थबोधकमित्यर्थकम् । तदुक्तं समर्थसूत्रे भाष्ये "परस्परव्यपेक्षां सामर्थ्यमेके । का पुनरशब्दयोर्व्यपेक्षा । न ब्रूमश्शब्दयोरिति किं तर्हि अर्थयोरि-

१ अभिधानस्यापर्यवसानम् अपूर्णतेत्यर्थः ।

ति"। ईदृशजिज्ञासोत्थापकं चैकपदार्थेऽपरपदार्थव्यतिरेकप्रयुक्तस्यान्वयबोधाजनकत्वस्य ज्ञानमिति तद्विषये तादृशान्वयबोधाजनकत्वेऽप्याकाङ्क्षेति व्यवहारः। यद्वा उत्थापकताविषयतान्यतरसम्बन्धेनोभयसम्बन्धेन वाऽर्थान्तरजिज्ञासा आकाङ्क्षा। आद्यं पश्य मृगो धावतीत्यत्र, दर्शनार्थस्य कारकधावनाकाङ्क्षोत्थापकत्वं धावनं तु तद्विषय एव। अन्त्यं पचति तण्डुलं देवदत्त इत्यादौ, क्रियाकारकयोर्द्वयोरपि परस्परं तदुत्थापकत्वात्तद्विषयत्वाच्च। अतएव घटः कर्मत्वम् आनयनं कृतिरित्यतो घटमानयेतिवन्नान्वयबोधः। आकाङ्क्षाविरहात्। घटमानयेति विभक्त्यन्ताख्यातान्तयोरेव साकाङ्क्षत्वाच्च।

योग्यता च परस्परान्वयप्रयोजकधर्मवत्त्वम्। तेन पयसा सिञ्चतीति वाक्यं योग्यम्। अस्ति च सेका-

---

१ एतादृशज्ञानस्य बोधहेतुत्वात् एकवारमन्वयबोधे जाते तदजनकत्वज्ञानाभावात् न पुनरन्वयबोधः। अन्वयबोधश्च तदाकाङ्क्षितसकलक्रियाकारकादिविषयो विवक्षितः। तेन खण्डवाक्यार्थबोधोत्तरं न महावाक्यार्थबोधानुपपत्तिः। एतन्मूलिकैव च सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति व्युत्पत्तिः इत्यादि लघुमञ्जूषायां स्पष्टं तत एवावगन्तव्यम्।

न्वयप्रयोजकद्रवद्रव्यत्वं योग्यता जले, करणत्वेन जलान्वयप्रयोजकार्द्रीकरणत्वं योग्यता सेककियायाम् । अत एव वह्निना सिञ्चतीति वाक्यमयोग्यम् । वह्नेः सेकान्वयप्रयोजकद्रवद्रव्यत्वाभावात् ।

एतादृशस्थलेषु नान्वयबोधः किंतु प्रत्येकं पदार्थबोधमात्रमिति नैयायिकाः । तन्न । बौद्धार्थस्यैव सर्वत्र बोधविषयत्वेन बाधस्याभावात् ॥

हरिरप्याह—

अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति चेति ।

अतो वन्ध्यासुतादिशब्दानां प्रातिपदिकत्वम् । वह्निना सिञ्चतीत्यतो बोधाभावे तद्वाक्यप्रयोक्तारं प्रति "अद्रवेण वह्निना कथं सेकं ब्रवीषि" इत्युपहासानापत्तेश्च । वाक्यार्थबोधे जाते बुद्ध्यर्थविषये प्रवृत्तिस्तु न भवति बुद्ध्यर्थेऽप्रामाण्यग्रहादित्यन्यत्र विस्तरः ॥

प्रकृतान्वयबोधाननुकूलपदान्यवधानमासत्तिः । गिरिराग्निमानित्यासन्नम् । अनासन्नं च गिरिर्भुक्तमग्निमान्देवदत्तेनेति । आसत्तिरपि मन्दबुद्धेरविलम्बेन शाब्दबोधे कारणम् । अमन्दबुद्धेस्त्वासत्त्यभावेऽपि पदार्थोपस्थितावाकाङ्क्षादितोऽविलम्बेनैव बोधो भवतीति न बोधे तस्याः कारणत्वम् । ध्वनितं

चेदं नेपदान्तसूत्रे भाष्ये । स्थाल्यामोदनं पचतीत्यादौ स्थाल्यामित्यस्यौदनपदेन व्यधानेऽपि प्रकृतान्वयबोधानुकूलत्वादासन्नत्वाक्षतिः ॥

एतद्वाक्यं पदं वा एतदर्थबोधायोच्चारणीयमितीश्वरेच्छा तात्पर्य्यम् । अत एव सति तात्पर्य्ये सर्वे सर्वार्थवाचका इति शाब्दिकनये घटशब्दात्पटप्रत्ययो नेत्याद्युक्तम् । नानार्थस्थले लोके तात्पर्य्यन्तु एतत्पदं वाक्यं वा एतदर्थप्रत्ययाय मयोच्चार्य्यते इति प्रयोक्तुरिच्छारूपम् । तात्पर्य्यनियामकं च लोके प्रकरणादिकमेव । अतो भोजनप्रकरणे सैन्धवमानयेत्युक्ते सैन्धवपदेन लवणप्रत्ययः । युद्धावसरेऽश्वप्रत्ययः । वेदवाक्ये ऐश्वरतात्पर्य्यादर्थबोधः । ननु प्रकरणादीनां शक्तिनियामकत्वे शक्त्यैव

१ तत्र हि स्वरदीर्घयलोपेष्वित्यादिवार्तिकस्य संग्रहसिद्धार्थकत्वप्रतिपादनार्थमिदमुक्तम् "आनुपूर्व्येण संनिविष्टानां यथेष्टमभिसम्बन्धः शक्यते कर्तुं नचैतान्यानुपूर्व्येण संनिविष्टानि । अनानुपूर्व्येण संनिविष्टानामपि यथेष्टमभिसम्बन्धो भवति । तद्यथा अनड्वाहमुदहारि या त्वं हरसि शिरसा कुम्भं भगिनि साचीनमभिधावन्तमद्राक्षीरित्यस्य यथेष्टमभिसम्बन्धो भवति उदहारि भागनि या त्वं कुम्भं हरसि शिरसा अनड्वाहं

निर्वाहे किन्तात्पर्य्येणेति चेन्न । अस्माच्छब्दादर्थद्वयविशेष्यको बोधो जायते अर्थद्वये शक्तिसत्त्वात्तात्पर्य्यं तु केति न जानीम इत्यनुभवविरोधात् । अत एव च पय आनयेत्युक्तेऽप्रकरणज्ञस्य दुग्धं जलं वा आनेयमिति प्रश्नः सङ्गच्छते । इत्याकाङ्क्षादिविचारः ॥

अथ सकलशब्दमूलभूतत्वाद्धात्वर्थो निरूप्यते । तत्र फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः । फलत्वं च तद्धात्वर्थजन्यत्वे सति कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वम् । विभागजन्यसंयोगादिरूपे पतत्यादिधात्वर्थे विभागसंयोगयोः फलत्ववारणायोभयम्[1] । कर्मप्रत्ययसमभिव्याहारे तु फलस्य विशेष्यता । व्यापारत्वं च धात्वर्थफलजनकत्वे सति धातुवाच्यत्वम् । अनुकूलत्वं संसर्गः । अनुकूलत्वं च फलनिष्ठजन्यतानिरूपितजनकत्वम् । "भावप्रधानमाख्यातं

साचीनमभिधावन्तमद्राक्षीरिति" ।

१ विभागस्य फलत्ववारणाय सत्यन्तोपादानम् । संयोगे तद्वारणाय प्रकारतावत्त्वान्तम् । तेन वृक्षात् पर्णं भूमौ पततीत्यादौ विभागाश्रयस्य वृक्षादेः संयोगाश्रयस्य भूम्यादेश्च न कर्मत्वमित्यादिकमूह्यम् ।

सत्त्वप्रधानानि नामानि" इति निरुक्तोक्तेर्व्यापारविशेष्यको बोधः । तत्र तिङ्वाच्यं संख्याविशेषकारकं कालश्च व्यापारविशेषणम् ॥

परे तु फलव्यापारयोर्द्धातोः पृथक्शक्त्यावुद्देश्यविधेयभावेनान्वयापत्तिस्तयोः स्यात् । पृथगुपस्थितयोस्तथा अन्वयस्यौत्सर्गिकत्वात् । किञ्चैकपदे व्युत्पत्तिद्वयकल्पनेऽतिगौरवम् । तथाहि—फलविशेषणकव्यापारबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणं व्यापारविशेषणकफलबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणमिति कार्य्यकारणभावद्वयकल्पनम्, धातोरर्थद्वये शक्तिद्वयकल्पनं, धातोर्बोधजनकत्वसंबन्धद्वयकल्पनं चातिगौरवम् । तस्मात्फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले च धातूनां शक्तिः, कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामक इत्याहुः ॥

१ यद्यपि फलावच्छिन्नव्यापारत्वस्य व्यापारावच्छिन्नफलत्वस्य च शक्यतावच्छेदकत्वकल्पनप्रयुक्तं गौरवमेतेषां मते स्फुटं तथापि भिन्नशक्तिवादिनां फलविशेषणकव्यापारविशेष्यकावान्तरवाक्यार्थबोधे कर्तृ

यत्तु मीमांसकाः फलं धात्वर्थो व्यापारः प्रत्ययार्थ इति वदन्ति । तन्न । लःकर्मणीत्यादिसूत्रविरोधापत्तेः । नहि तेन व्यापारस्य प्रत्ययार्थता लभ्यते ।

किञ्च पचति पक्ष्यति पक्ववानित्यादौ फूत्कारादिप्रतीतये तत्रानेकप्रत्ययानां शक्तिकल्पनापेक्षयैकस्य धातोरेव शक्तिकल्पनोचिता ।

किञ्च फूत्कारादेः प्रत्ययार्थत्वे गच्छतीत्यादौ तत्प्रतीतिवारणाय तद्बोधे पचिसमभिव्याहारस्यापि कारणत्वकल्पनेऽतिगौरवम् ।

किञ्च सकर्मकाकर्मकव्यवहारोच्छेदापत्तिः ।

प्रत्ययसमभिव्याहृतधातुजन्यसमूहालम्बनात्मकोपस्थितिः कारणं, व्यापारविशेषणकफलबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्यसमूहालम्बनात्मकोपस्थितिः कारणमिति कार्यकारणभावद्वयकल्पनेऽतिगौरवम् । विशिष्टशक्तिवादिनां तु तत्तत्समभिव्याहारवशाद् अवान्तरवाक्यार्थबोधस्थानीया विशिष्टोपस्थितिरेवेति न तेषामुक्तकार्यकारणभावद्वयम् । एवं धातोः फलव्यापारसमूहार्थे उपस्थितिशक्तिकल्पनं विशिष्टार्थे शाब्दबोधशक्तिकल्पनं, शक्तेः बोधजनकतायाश्च असम्बद्धे धातौ अनुपपत्त्या विशिष्टार्थनिरूपितसम्बन्धद्वयकल्पनं च विशिष्टधातावित्यातिगौरवम् इति दिक् ।

न च प्रत्ययार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वं तन्मते तत्समानाधिकरणफलवाचकत्वमकर्मकत्वं च, प्रत्ययार्थव्यापाराश्रयत्वं कर्तृत्वम्, घटं भावयतीत्यादौ णिजर्थव्यापारव्यधिकरण फलाश्रयत्वेन घटादेः कर्मत्वमिति वाच्यम्। अभिधानानभिधानव्यवस्थोच्छेदापत्तेः। न च व्यापारेणाश्रयाक्षेपात्कर्तुरभिधानम्, कर्माख्याते च प्रधानेन फलेन स्वाश्रयाक्षेपात्कर्मणोऽभिधानमिति वाच्यम्। जातिशक्तिवादे जात्याक्षिप्तव्यक्तेरिवाश्रयप्राधान्यापत्तौ क्रियाप्रधानमाख्यातमितियास्कवचोविरोधापत्तेः।

किञ्च फलस्य धातुना तदाश्रयस्य चाक्षेपेणैव लाभसम्भवेन लःकर्मणीत्यस्य वैयर्थ्यापत्तेः। कर्मकर्तृकृतां कारकभावनोभयवाचकत्वे गौरवाच्च।

किञ्च भावविहितयञादीनां व्यापारावाचकत्वे ग्रामो गमनवानित्याद्यापत्तिः। तद्वाचकत्वे तेनापि स्वाश्रयाक्षेपे कर्तुरभिधानापत्तिः।

किञ्च गुरुः शिष्याभ्यां पाचयतीत्यादौ "हेतुमतिच" इतिसूत्रबलात् प्रयोजकव्यापारस्य णिजर्थत्वे स्थिते प्रयोज्यव्यापार आख्यातार्थो वाच्यः, एवञ्च

संख्यायाः स्ववाचकाख्यातार्थव्यापारेऽन्वयिन्येवाऽन्वयाच्छिष्याभ्यामिति द्विवचनानापत्तिः । पाचयतीत्येकवचनानापत्तिश्च । गुरोरनभिधानेन तत्र प्रथमाया अनापत्तेश्च । शिष्यशब्दात्तदापत्तेश्चेत्यन्यत्र विस्तरः । सर्वकारकान्वयितावच्छेदकधर्मवती क्रिया ।

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ॥
आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते ॥ १ ॥
गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ॥
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥ २ ॥

इति भूवादिसूत्रस्थभाष्यार्थप्रतिपादकहरिग्रन्थात् । क्रमजन्मनां व्यापाराणां समूहं प्रति गुणभूतैरवयवैर्युक्तः संकलनात्मिकयैकत्वबुद्ध्या प्रकल्पिताभेदरूपः समूहः क्रियेति व्यवह्रियते इति द्वितीयकारिकार्थः । अत्रावयवाश्रयं पौर्वापर्यं समुदायाश्रयमेकत्वम् । क्षणनश्वराणां व्यापाराणां वस्तुभूतसमुदायाभावात् बुद्ध्येत्युक्तम् । पचति पक्ष्यतीत्यादावसिद्धम्, अपाक्षीदित्यादौ सिद्धं वा साध्यत्वेनाभिधीयमानं क्रिया । आश्रितेति योगदर्शनं कृतम् अवयवानां क्रमेणोत्पत्त्या । अत एवाश्रितक्रमरूपा क्रियेति आदिमकारिकार्थः ।

एकैकावयवेऽपि समूहरूपारोपादधिश्रयणकालेऽपि पचतीति व्यवहारः । तदुक्तम्—

एकदेशे समूहे वा व्यापारणां पचादयः ।
स्वभावतः प्रवर्तन्ते तुल्यरूपं समाश्रिताः इति ॥

अत्र केचित् । सिद्धत्वं क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकवैजात्यवत्त्वे सति कारकत्वेन क्रियान्वयित्वे सति कारकान्तरान्वयायोग्यत्वम् । साध्यत्वं च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकं सत् कारकान्तरान्वययोग्यतावच्छेदकरूपवत्त्वम् । हिरुगाद्यव्ययानां साध्यत्वाभावेऽपि क्रियावाचकत्वव्यवहारस्तु क्रियामात्रविशेषणत्वात् । तत्र सिद्धत्वं पाक इत्यादौ घञादिवाच्यम् । साध्यत्वं तु सर्वत्रैव धातुप्रतिपाद्यम् । ननु हरिं नमेच्चेत्सुखं यायात् इत्यत्र क्रियाया अपि क्रियान्तराकाङ्क्षत्वेन सिद्धत्वमस्ति इति चेन्न । चेच्छब्दसमभिव्याहारेणाकाङ्क्षोत्थापनात् इत्याहुः ।

वस्तुतः साध्यत्वं निष्पाद्यत्वमेव तद्रूपेणैव बोधः । स्पष्टं चेदम् उपपदमतिङित्यादौ भाष्ये । ननु घटं करोतीत्यादौ द्रव्यस्यापि साध्यत्वेन प्रतीतिरिति चेन्न । करोतिपदादिसमभिव्याहात् तथा प्रत्ययेऽपि स्वतो घटादिपदाद् द्रव्यस्य सिद्धत्वेनैव प्रतीतेः ।

अस्तिभवतिवर्ततिविद्यतीनामर्थः सत्ता । सा चानेककालस्थायिनीति कालगतसौकर्य्येण क्रमवतीति तस्याः क्रियात्वम् । सत्तेहास्त्यर्थधारणम् । सकर्मकत्वञ्च फलव्यधिकरणव्यापारवाचकत्वं, फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वम् । क्वचित्तु फलांशाभावादकर्मकत्वम् । यथाऽस्त्यादौ केवलं सत्तादिरेवार्थः । फलांशस्य सूक्ष्मदृष्ट्याऽप्यप्रतीतेः । उत्पन्नस्य सत्त्वस्य स्वरूपधारणरूपां सत्तामाचष्टेऽस्त्यादिरिति निरुक्तोक्तेश्च ।

वस्तुतस्तु शब्दशास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वम् । तदनन्वय्यर्थकत्वमकर्मकत्वम् । तेनाध्यासिता भूमय इत्यादिसिद्धिः । अन्वयश्च पृथग्बुद्धेन संसर्गरूपः । अन्वयपदस्य तत्रैव व्युत्पत्तेः । तेन जीवतीत्यादौ न दोषः । तत्र प्राणादिरूपकर्मणो धारणार्थधात्वर्थात्पृथगबोधादिति सुप आत्मन इति सूत्रे भाष्ये स्पष्टम् । अधिशीङ्स्थेत्यनेन भूमय इत्याधारस्य कर्मत्वम् ।

जानातेर्विषयतया ज्ञानं फलम्, आत्ममनःसंयोगो व्यापारः । अतएव मनो जानातीत्युपपद्यते । आत्मा ऽत्रान्तःकरणं, मनोऽपि तद्वृत्तिविशेषरूपम् । आ-

त्मा आत्मानं जानातीत्यादौ अन्तःकरणावच्छिन्नः कर्ता शरीरावच्छिन्नं कर्मेति कर्मवत्सूत्रे भाष्ये स्पष्टम् ।

यत्तु आवरणभङ्गो विषयता वा फलम्, व्यापारस्तु ज्ञानमेवेति । तन्न । कर्मस्थक्रियकत्वापत्तेः । तद्व्यवस्था चेत्थमुक्ता हरिणा,

विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता ।
क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पितेति ॥

अस्यार्थः । यत्र कर्मणि कर्तरि वा क्रियाकृतो विशेषः कश्चिद् दृश्यते तत्र क्रिया व्यवस्थितेत्युच्यते । नन्वेवं पच्यादिकर्तर्यपि श्रमादिरूपविशेषस्य दर्शनादिदमयुक्तम् । किञ्च चिन्तयति पश्यतीत्यादीनां कर्तृस्थभावकत्वानुपपत्तिः । कर्तरि क्रियाकृतविशेषाभावात् । अत आह अन्येषामिति । मते इति शेषः । यत्र कर्तृकर्मसाधारणरूपं फलं शब्देन प्रतिपाद्यते स कर्तृस्थभावकः—यथा पश्यति घटं, ग्रामं गच्छति, हसतीत्यादौ । तत्र विषयातासमवायाभ्यां ज्ञानमुभयनिष्ठं, संयोगश्चोभयनिष्ठः । एवं हासोऽपि । न हि विषयताऽऽवरणभङ्गावेवम् । यत्र कर्त्रवृत्तिकर्मस्थफलं स कर्मस्थभावकः । यथा भिनत्तीत्यादौ । न हि द्विधाभवनादि कथमपि कर्तृनिष्ठमिति हलाराजः ।

तथा चावरणभङ्गस्य विषयतायाश्च कर्ममात्रनिष्ठत्वा-ज्ज्ञानातेरपि कर्मस्थक्रियकत्वापत्तिरित्यलम् ।

इच्छतेरिच्छानुकूलं ज्ञानमर्थः । अतीतानागत योरपि बुद्ध्युपारोहात् फलशालित्वम् ।

पतिर्गमिवत्सकर्मकः । नरकं पतित इत्यादिप्र-योगात् । विभागजन्यसंयोगमात्रंपरत्वेऽकर्मक इति । कुत्र उत्पत्तिव्यधिकरणस्तदनुकूलो व्यापारोऽर्थः । फलमात्रार्थकत्वेऽकर्मकत्वापत्तिर्यातिवत् । किञ्च क-र्मस्थभावकत्वाभावात् कर्मकर्तरि यगाद्यनापत्तिः । कृतिरित्यादौ धातूनामनेकार्थत्वात् यत्नमात्रे वृत्तिः । यद्वा यत्नकृतिशब्दयोरपि व्यापारसामान्यवाचितैव । अत एव स्थालीस्थे यत्ने पचिना कथ्यमाने स्थाली पचतीति कारके इति सूत्रे भाष्ये उक्तमित्यलम् ।

यत्तु तार्किकाः—फलव्यापारौ धात्वर्थः । ल-काराणां कृतावेव शक्तिर्लाघवात् , नतु कर्तरि, कृ-तिमतः कर्तृत्वेन तत्र शक्तौ गौरवात् । प्रथमान्तपदेनैव तल्लाभाच्च । आख्यातार्थे धात्वर्थो विशेषणं, प्रकृत्य-र्थप्रत्ययार्थयोः सहार्थत्वे प्रत्ययार्थस्यैव प्राधान्या-त् । प्रथमान्तार्थे आख्यातार्थो विशेषणम् । अनुकूल-त्वमाश्रयत्वञ्च संसर्गः । तथाच चैत्रः पचतीत्यादौ

विक्लित्त्यनुकूलव्यापारानुकूलकृतिमांश्चैत्र इति बोधः। रथो गच्छतीत्यादौ रथस्याचेतनत्वात् यत्नशून्यत्वेन व्यापारे आश्रयत्वे वा आख्यातस्य लक्षणेत्याहुः॥

तन्न। युष्मदस्मदोर्लकारेण सामानाधिकरण्याभावात् पुरुषव्यवस्थाऽनापत्तेः। पचन्तं चैत्रं पश्य, पचते देवत्ताय देहीत्यादौ शतृशानजादीनामपि तिबादिवल्लादेशाविशेषेण तेभ्यः कृतिमात्रबोधापत्तेश्च। नचेष्टापत्तिराश्रयाश्रयिभावेन कर्मणि सम्प्रदाने च कृतेरन्वयादिति वाच्यम्। नामार्थयोरभेदान्वयो व्युत्पन्न इतिव्युत्पत्तिभङ्गापत्तेः।

ननु फलमुखगौरवं न दोषायेति न्यायेन शत्रादीनां कर्तरि शक्तिः तिबादीनां कृतावेव इति चेन्न। स्थान्येव वाचको लाघवात्, आदेशानां बहुत्वेन तेषां वाचकत्वे गौरवमिति हि तव मतम्। एवं च तिबादीनां शत्रादीनां च स्थानिस्मारकतया लिपिस्थानीयत्वं, बोधकस्तु लकार एव। स च शत्राद्यन्ते कर्तरि शक्तस्तिबाद्यन्ते कथं कृतिं बोधयेत्। अन्यायश्चानेकार्थत्वमिति न्यायात्।

ननु लः कर्म्मणीति सूत्रे कर्तृकर्म्मपदे भावप्रधाने, तथाच कर्तृत्वं कृतिः कर्म्मत्वं फलं तयोः शक्तौ सूत्र-

स्वरसः । कर्म्मप्रत्ययान्ते पच्यते ओदनो देवदत्तेनेत्यादौ देवदत्तनिष्ठकृतिजन्यव्यापारजन्यविक्लित्तिमान् ओदन इति बोधः । कर्तरि कृदिति सूत्रे तु कर्तरीति पदस्य धर्म्मिप्रधानत्वात् कृत्याश्रये शत्रादीनां शक्तिरिति चेन्न । कर्तरि कृदिति सूत्रे यत्कर्तृग्रहणं तस्यैव लःकर्म्मणीति सूत्रे चकारानुकृष्टत्वेन भावप्रधानत्वे सूत्रस्वरसाभावात् । शत्रादीनां स्थान्यर्थाभिधानसमर्थस्यैवादेशत्वमिति न्यायेन स्थान्यर्थेन निराकाङ्क्षत्वादाकाङ्क्षितविधानं ज्याय इति न्यायात् कर्त्तरि कृदित्यनेन शक्तिग्रहाभावात् । अन्यथा देवदत्तेन शय्यमाने आस्यमाने च यज्ञदत्तो गत इत्यादौ भावे शानजनापत्तेः ।

ननु नामार्थयोरभेदान्वयानुरोधात् शतृशानजादीनां कर्त्तरि शक्तिरिति चेन्न । पचतिकल्पं पचतिरूपं देवदत्त इत्याद्यनुरोधेन तिङ्क्ष्वपि कर्तुरेव वाच्यत्वौचित्यात् ।

किञ्च कृतिवाच्यत्वे रथो गच्छतीत्यादौ आश्रये लक्षणास्वीकारे गौरवापत्तिः । अभिहितत्वान-

१ भावविहितलकारस्थानिकभिन्नानामिति शेषः । तेन न पूर्वप्रयोगासङ्गतिः ।

भिहितत्वव्यवस्थोच्छेदापत्तिश्च । न चानभिहितइति सूत्रस्यानभिहितसंख्याकेइत्यर्थवर्णनमिति वाच्यम् । कृत्तद्धितसमासैः सङ्ख्याऽभिधानस्याप्रसिद्धत्वात् । किञ्च यत्नोऽपि व्यापारसामान्यं धातुत एव लभ्यते, स्थालीस्थे यत्ने पचिना कथ्यमाने स्थाली पचतीति कारके इत्यधिकारसूत्रे भाष्यप्रयोगात्, अनन्यलभ्यस्यैव शब्दार्थत्वात् कृतौ शक्तेरुक्तिसम्भव एव नेत्यलम् ॥

आख्यातार्थे धात्वर्थो विशेषणमित्यस्य निराकरणमवशिष्यते । तथाहि । प्रकृत्यर्थप्रत्ययार्थयोः सहार्थत्वे प्रत्ययार्थस्यैव प्राधान्यमित्युत्सर्गः । पाचक औपगव इत्युदाहरणं, पाकक्रियाश्रयः उपगुसम्बन्ध्यभिन्नापत्यमिति प्रत्ययार्थस्य प्राधान्यन्तयोरर्थे । तत्रापि प्रत्ययवाच्यस्यैवार्थस्य प्राधान्यम् । द्योत्यस्य त्वप्राधान्यमेव । यथा अजा इत्यत्र स्त्रीत्वविशिष्टपशुविशेष इति बोधः । तस्योत्सर्गस्य भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानीति यास्कवचनमपवादः । तेनाख्याते तिङन्ते क्रियाया एव प्राधान्यं शाब्दबोधे न प्रत्ययार्थस्येति बोध्यम् ।

यत्तु आख्यातपदेन तिङ्मात्रग्रहणाद्भावप्रधानमित्यत्र षष्ठीतत्पुरुषाश्रयणात् प्रत्ययार्थप्राधान्य-

मेव फलतीति । तन्न । आख्यातमाख्यातेन क्रियासातत्ये इति सूत्रे आख्यातपदेन तिङन्तस्यैव ग्रहणात् । उत्सर्गेणैव निर्वाहे यास्ककृतापवादवचनवैयर्थ्यापत्तेश्च । तस्माद्धात्वप्रधानमित्यत्र बहुव्रीहिः । आख्यातपदेन तिङन्तस्यैव ग्रहणमित्यलम् ।

प्रथमान्तार्थमुख्यविशेष्यको बोधस्तार्किकमते इति निराकर्तुमवशिष्यते । तथा हि शाब्दिकमते पश्य मृगो धावतीत्यादौ मृगकर्तृकं धावनं दृशिक्रियायाः कर्म्म, प्रधानं दृशिक्रियैव । तथा च मृगकर्तृकधावनकर्म्मकं प्रेरणाविषयीभूतं त्वत्कर्तृकं दर्शनमिति बोधः । तत्र मृगो धावतीत्यत्र विशेष्यभूतधावनरूपार्थवाचकस्य धावतीत्यस्य प्रातिपदिकत्वाभावान्न द्वितीया । कर्म्मत्वन्तु संसर्गमर्यादया भासते । एवं पचति भवतीत्यत्र पचिक्रियाकर्तृका सत्तेति बोधः । पच्यादयः क्रिया भवतिक्रियायाः कत्रर्थो भवन्तीति भूवादिसूत्रस्थभाष्यात् ।

उक्तञ्च हरिणा,

सुबन्तं हि यथाऽनेकन्तिङन्तस्य विशेषणम् ।
तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणमिति ॥

तार्किकमतेतु अन्यदेशसंयोगानुकूलधावनानुकूल-

कृतिमन्मृगकर्मकं प्रेरणाविषयीभूतं यद्दर्शनं तदनुकूल-कृतिमांस्त्वमिति बोधः। तत्र विशेष्यभूतार्थवाचकमृग-शब्दस्य प्रातिपदिकत्वात् दृशिक्रियाकर्म्मत्वाच्च द्वितीयापत्तौ धावन्तं मृगं पश्येतिवत् पश्य मृगन्धावतीत्यापत्तेः। अप्रथमासमानाधिकरणे शतृशानचोर्नित्यत्वादेवंप्रयोगाविलयापत्तेश्च॥

ननु विशिष्टार्थवाचकस्य धावति मृग इति वाक्यस्य कर्म्मत्वेऽपि पृथङ् मृग इत्यस्य प्रातिपदिकस्य कर्म्मत्वाभावान्न द्वितीयेति चेन्न। अनभिहिते इत्यधिकारसूत्रप्रघट्टके अभिधानञ्च तिङ्कृत्तद्धितसमासैरित्येतत्परिगणनप्रत्याख्यानपरभाष्यरीत्या द्वितीयाऽऽपत्तेः। तथाहि—कटं भीष्मं कुर्विन्यादौ विशेष्यकटशब्दादुत्पन्नद्वितीयया कर्म्मत्वस्योक्तत्वात् विशेषणीभूतभीष्मशब्दाद् द्वितीया न स्यादतः परिगणनं भाष्ये कृतम्। तत्प्रत्याख्यानञ्च सर्वकारकाणां साक्षात्स्वाश्रयद्वारा वा अरुणाधिकरणन्यायेन भावनान्वयस्वीकारात्। अत एवोक्तम्भाष्ये कटोऽपि कर्म्म भीष्मादयोऽपीति। तत्र कटनिष्ठकर्म्मत्वोक्तावपि भीष्मत्वादिगुणाविशिष्टकर्म्मत्वानुक्तेस्तस्माद् द्वितीयेति तात्पर्यम्। उभयोः पश्चात्पर-

स्परमन्वयस्तु विशेष्यविशेषणभावेन । अयमेवान्वयः पार्ष्णिकः इत्युच्यते । एवमेवान्वयोऽरुणाधिकरणे अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणातीत्यत्र क्रयणक्रियायां मीमांसकैस्स्वीकृतः । तस्माद्धावति मृग इत्यत्र उभयोः कर्म्मत्वे धावतीत्यस्य प्रातिपदिकत्वाभावाद् विशेषणत्वेनान्यत्र निराकाङ्क्षत्वाच्च द्वितीयोत्पत्त्यभावेऽपि मृगशब्दाद् द्वितीया दुर्वारैवेत्यवेहि । शाब्दिकमतेतु क्रियाविशेषणत्वेनेतरार्थे निराकाङ्क्षत्वाद् मृगशब्दान्न द्वितीया । तार्किकमते तु विशेष्यार्थवाचकात् मृगशब्दात् राज्ञः पुरुषमानयेतिवद् द्वितीया दुर्वारेत्यलमतिविस्तरेण। इति धात्वर्थनिर्णयः।

अथ निपातार्थनिर्णयः । अनुभूयते सुखं, साक्षात् क्रियते गुरुरित्यादौ निपातानां द्योतकत्वेनानुभवसाक्षात्काररूपफलयोर्धात्वर्थत्वेन सकर्म्मकत्वम् । कर्म्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्म्मकत्वमितिनिष्कृष्टमतेऽपि फलाश्रयतया कर्म्मसंज्ञकस्य धात्वर्थफले एवान्वयौचित्येन द्योतकत्वमावश्यकम् । द्योतकत्वञ्च स्वसमभिव्याहृतपदनिष्ठवृत्त्युद्बोधकत्वम् । क्वचित्तु क्रियाविशेषाक्षेपकत्वं द्योतकत्वम् । यथा प्रादेशं विलिखतीत्यादौ विमानक्रियाक्षेपकः । प्रादेशं-

विमाय लिखतीत्यर्थावगमात्। अत्र एव अथ शब्दानुशासनमित्यत्राथशब्दस्य प्रारम्भक्रियाक्षेपकत्वं कैयटाद्युक्तं सङ्गच्छते । क्वचित्तु सम्बन्धपरिच्छेदकत्वं द्योतकत्वम् । यथा कर्म्मप्रवचनीयानाम् । विशिष्टस्य न धातुत्वम् । अपाठात् । अडाद्यव्यवस्थापत्तेश्च ।

यत्तु तार्किकाः—उपसर्गाणां द्योतकत्वं तदितरनिपातानां वाचकत्वं, साक्षात्प्रत्यक्षतुल्ययोरिति कोशात्। नमःपदेन देवाय नम इत्यादौ नमस्कारार्थस्य, दानावसरे गवे नम इत्यत्र पूजार्थस्य प्रसिद्धत्वाच्च । सकर्म्मकत्वञ्च स्वस्वसमभिव्याहृतनिपातान्यतरार्थफलव्यधिकरणव्यापारवाचकत्वम् । कर्म्मत्वञ्च स्वस्वसमभिव्याहृतनिपातान्यतरार्थफलशालित्वमित्याहुः । तन्न । वैषम्ये बीजाभावात् । अनुभूयते इत्यनेन साक्षात्क्रियते इत्यस्य समत्वात् । नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयाभावात् निपातार्थधात्वर्थयोरन्वयस्यैवासम्भवात् । निपातार्थफलाश्रयत्वेऽपि धात्वर्थान्वयं विना कर्म्मत्वानुपपत्तेश्च ।

यदपि केचिच्छाब्दिकाः—निपातानां वाचकत्वे शोभनः समुच्चय इतिवत् शोभनश्च इत्यापत्तिः। घटस्य समुच्चय इतिवत् घटस्य च इत्यापत्तिश्चेत्या-

हुः । तन्न । शब्दशक्तिस्वभावेन निपातैः स्वार्थस्य परविशेषणत्वेनैव बोधनेन विशेषणान्वयाप्रसङ्गात् । षष्ठ्यप्राप्तेश्च । किञ्च घटं पटञ्च पश्येत्यादौ घटमित्यस्य क्रियायामेवान्वयः । अत एव ततो द्वितीया । घटं समुच्चयवन्तं पटम्पश्येति बोधः । समुच्चयस्य प्रतियोग्याकाङ्क्षायां सन्निहितत्वात्

१ प्रकारतासम्बन्धेन शाब्दबोधं प्रत्येव चादिनिपातविशेषजन्योपस्थितेः कारणत्वं, नतु यत्किञ्चिदर्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति कारणत्वम् । अतो न शोभनादिपदार्थान्वयस्तत्र । घटो नास्तीत्यादौ नञ्जन्योपस्थितेः विशेष्यतासम्बन्धेन घटप्रकारकशाब्दबोधं प्रत्यपि कारणत्वाङ्गीकारात् निपातविशेषेति उपात्तम् । सामान्यत एव विशेष्यतासम्बन्धेन किञ्चिदर्थनिष्ठप्रकारताकशाब्दबोधं प्रति चादिनपातविशेषजन्योपस्थितेः कारणत्वानङ्गीकारात् प्रतियोगित्वादिसम्बन्धेन घटादिपदार्थस्य समुच्चयादावन्वयसम्भवेन षष्ठ्यापत्तिरपि इत्थमेव वारिता । चशब्दद्योत्यसमुच्चयस्यासत्त्वभूतत्वात् षष्ठ्यप्राप्तेश्चेति क्वाचित्को ऽपपाठः । मातुः स्मरतीत्यादौ असत्त्वभूतक्रियान्वये गृहस्योपरीत्यादौ तादृशान्वयान्वयेऽपि षष्ठ्या दृष्टत्वात तेन हेतुना तद्वारणासम्भवादिति बोध्यम् ।

घटस्य प्रतियोगित्वं, पटे तु समुच्चयस्य भेदेनान्वयो न तु पटस्य समुच्चये इति क षष्ठ्यापादनम् । नामार्थयोरभेदान्वयव्युत्पत्तिस्तु निपातातिरिक्तविषया ।

निपातानामर्थवत्त्वमपि द्योत्यार्थमादायैव । शक्तिलक्षणा-द्योतकताऽन्यतमसम्बन्धेन बोधकत्वस्यैवार्थवत्त्वात् । नञ्समासे उत्तरपदार्थप्राधान्यं द्योत्यार्थापेक्षयैव । प्रतिष्ठते इत्यत्र तिष्ठतिरेव गतिवाची, धातू-

---

१ अत्र (घटमित्यस्य क्रियायामेवान्वयः) इत्यादेः (क षष्ठ्यापादनम्) इत्यन्तस्य स्थाने (घटपदस्य घटप्रतियोगिकसमुच्चयवति अप्रसिद्धा शक्तिरेव लक्षणा) इत्यादिः पाठोऽस्ति, स न युक्तः सन्दर्भविरुद्धत्वात् लघुमञ्जूषाऽसंमतत्वाच्चेति बोध्यम् ।

२ अतः समुच्चयस्य अनुयोगित्वसम्बन्धेन पटेऽन्वयो नानुपपन्न इति भावः । लिङ्गसंख्यान्वय्यर्थप्रतिपादकत्वमेव नामत्वं, तच्च निपातेषु नेत्यतोऽपि न तद्व्युत्पत्तिविरोधः । यद्वा समुच्चयवांश्चार्थः । तेन अभेदान्वयः समञ्जस एवेत्यादि लघुमञ्जूषायां स्पष्टम् ।

३ प्राचीनानां वाचकत्वपक्षे शोभनश्चेत्यादिदूषणस्याभिधानमसंगतमिति प्रतिपादितम् । इदानीं द्योतकत्वपक्षेऽपि न किंचिद् दूषणमिति नैयायिकान् प्रत्युच्यते—निपातानामिति ।

नामनेकार्थत्वात् । प्रशब्दस्तु तदर्थगत्यादित्वस्य द्योतकः ।

अत एव धातुः पूर्वं साधनेन युज्यते पश्चादुपसर्गेणेति सिद्धान्तितम् । साधनं कारकम् तत्प्रयुक्तकार्येण, उपसर्गेण उपसर्गसंज्ञकशब्देन । तत्र हि भाष्ये "पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेनेति । नैतत्सारं पूर्वं धातुस्साधनेन युज्यते पश्चादुपसर्गेण साधनं हि क्रियां [2]निर्वर्तयति तामुपसर्गो विशिनष्टीति[3] । सत्यमेवमेतत् । यस्त्वसौ धातूपसर्गयो-

---

१ तदर्थगतेः स्थाधात्वर्थगतेः आदित्वस्य द्योतक इत्यर्थः । तेन प्रतिष्ठते इत्यस्य गन्तुं प्रवर्तते इत्यर्थो बोध्यः ।

२ निर्वर्तयति साध्यत्ववैशिष्ट्येन बोधयतीत्यर्थः ।

३ विशिनष्टि स्वद्योत्यविशेषणवैशिष्ट्येन बोधयतीत्यर्थः । साध्यत्वेन ज्ञानं विना क्रियायोगे विहितोपसर्गसंज्ञकशब्दैर्योगाज्ञानादिति पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेत्यस्य तात्पर्यम् ।

४ धातूपसर्गकार्यस्य सुडादेरन्तरङ्गत्वोपपादनायाह य स्त्वसाविति । यः धातूपसर्गसंबन्धकृतत्वेनाभिमतोऽर्थः तं धातुः उपसर्गसंज्ञकशब्दयोगं विनाऽपि अभ्यन्तरं कृत्वाऽर्थत्वेनाङ्गीकृत्य साधनेन युज्यते इत्यर्थः । एवं च पूर्वमुपसर्गयोगो नाम तदर्थसंबन्धः । ततः उपसर्गशब्दयोगात्

रभिसम्बन्धस्तमभ्यन्तरं कृत्वा धातुस्साधनेन युज्यते। अवश्यं चैतदेवं विज्ञेयं यो ह्येवं मन्यते पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति तस्य आस्यते गुरुणा इत्यकर्म्मकः उपास्यते गुरुरिति केन सकर्मकः स्यात्" इति।

हरिणाऽप्युक्तम्,

धातोस्साधनयोगस्य भाविनः प्रक्रमाद्यथा।
धातुत्वं कर्म्मभावश्च तथाऽन्यदपि दृश्यताम्॥
बुद्धिस्थादभिसम्बन्धात्तथा धातूपसर्गयोः।
अभ्यन्तरीकृतो भेदः पदकाले प्रकाशते॥ इति।

अस्यार्थः। यथा भाविसाधनसम्बन्धाश्रयणेन क्रियावाचित्वमाश्रित्य धातुसंज्ञोच्यते, यथा च सन्प्रत्यये चिकीर्षिते भावीषिकर्म्मत्वमाश्रित्योपक्रमे एवे

पूर्वं साधनकार्ययोगः, ततः उपसर्गशब्दयोग इति "पूर्वं धातुः साधनेन युज्यते, पूर्वं धातुरुपसर्गेण युज्यते" इति परिभाषाद्वयस्यापि तात्पर्यम्। एवं च सुटः पूर्वोपस्थितभूषणाद्यर्थनिमित्तकत्वेनान्तरङ्गत्वमुपपन्नम्। यत्तु उपसर्गकार्यं नार्थानिमित्तकं तत्तु पूर्वागतसाधनानिमित्तककार्याद् बहिरङ्गमेव। तेन प्रत्ययः अध्ययनम् इत्यादौ यणादिकमेवान्तरङ्गत्वात् भवति। अत एव णेरध्ययने इत्यादिनिर्देशसङ्गतिः इत्यादिकमन्यतो बोध्यम्।

षिकर्म्मत्वमुक्तम्, तथा भाव्युपसर्गसम्बन्धादुपक्रमे एव विशिष्टक्रियावाचकत्वं दृश्यताम् । धातूपसर्गयोस्सम्बन्धं बुद्धिविषयीकृत्योपसर्गार्थकृतो विशेषः धातुनैवाभ्यन्तरीकृतः पदप्रयोगकाले उपसर्गसम्बन्धे सति प्रकाशते । श्रोतुरिति शेषः । उपसर्गयोगात्प्रागेव धातुनैवोपसर्गार्थविशिष्टः स्वार्थ उच्यते इति तात्पर्यम् । पूर्वं धातुरुपसर्गेणेति तु तदर्थस्य धात्वर्थान्तर्भावाद् व्यवहारः ।

चन्द्र इव मुखमित्यादौ चन्द्रपदस्य स्वसदृशे Sप्रसिद्धा शक्तिरेव लक्षणा । नञिवयुक्तमन्यसदृशाधिकरणे इति न्यायात् । इवपदं तात्पर्यग्राहकम् । तात्पर्यग्राहकत्वञ्च स्वसमभिव्याहृतपदस्यार्थान्तरशक्तिद्योतकत्वमित्यागतम् इवनिपातस्य द्योतकत्वम् ।

यत्तु इवार्थस्सादृश्यं तत्र प्रतियोग्यनुयोगिभावेनैव चन्द्रमुखयोरन्वयोपपत्तौ किं लक्षणया । तथा च चन्द्रप्रतियोगिकसादृश्याश्रयो मुखमिति बोध इत्याहुः । तन्न । चन्द्र इव मुखं दृश्यते चन्द्रमिव मुखं पश्यामीत्यादौ चन्द्रपदस्य मुखरूपकर्म्मसामानाधिरण्याभावादुक्तानुक्तत्वप्रयुक्तविभक्त्यनापत्तेः । षष्ठ्यापत्तेश्च ।

परेत्विवशब्दस्योपमानताद्योतकत्वम् । उपमान-

त्वञ्च उपमानोपमेयोभयनिष्ठसाधारणधर्म्मवत्त्वेनेषदितरपरिच्छेदकत्वम् । तद्धर्म्मवत्तया परिच्छेद्यत्वञ्चोपमेयत्वम् । साधारणधर्म्मसम्बन्धश्च क्वचिद् विशेष्यतयाऽन्वेति क्वचिद् विशेषणतया । एवञ्च चन्द्र इव आह्लादकं मुखमित्यादौ आह्लादकोपमानभूतचन्द्राभिन्नमाह्लादकं मुखमिति बोधः । चन्द्र इव मुखमाह्लादयतीत्यादौ चोपमानभूतचन्द्रकर्तृकाह्लादाभिन्नो मुखकर्तृकाह्लाद इति बोधः । इदम् उपमानानि सामान्यवचनैरित्यत्र भाष्ये स्पष्टमित्याहुः ।

---

१ तत्र हि भाष्ये "किमिहोदाहरणम् । शस्त्रीश्यामा । क पुनरयं श्यामाशब्दो वर्तते । शस्त्र्यामित्याह। केन तर्हीदानीं देवदत्ताऽभिधीयते । समासेन । (यदि श्यामाशब्देन शस्त्री अभिधीयते उपमेयं समासेन अभिधीयते तर्हि पुंस्त्वविशिष्टदेवदत्तादेरपि उपमेयत्वे श्यामशब्दस्य तदनभिधायकत्वात् स्त्रीत्वविशिष्टशस्त्र्यभिधायकत्वाच्च टापि) शस्त्रीश्यामो देवदत्त इति (पुंलिङ्गप्रयोगो) न सिध्यति । गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वं भविष्यति । यद्येवं कुम्भकपाललोहिनी इत्यत्र वर्णादनुदात्तादिति अनुपसर्जनलक्षण ईकारो न प्राप्नोति । एवं तर्हि शस्त्र्यामेव शस्त्रीशब्दो देवदत्तायां श्यामाशब्दः। एवमपि समानाधिकरणेनेति वर्तते, व्यधिकरणत्वात्समासो न प्राप्नोति । किं हि वचनान्न भवति । यद्यपि ता-

वद्बहुवचनात्समासः स्यात् । इह खलु मृगीव चपला मृग-चपलेत्यत्र समानाधिकरणलक्षणः पुंवद्भावो न प्राप्नोति । एवं तर्हि तस्यामेवोभयं वर्तते । युक्त चैतत् ? इतरथाहि बहूपेक्ष्यं स्यात् । यदि तावत् एवं विग्रहः करिष्यते शस्त्रीव श्यामा देवदत्तेति, शस्त्र्यां श्यामेत्येतदपेक्ष्यं स्यात् । अथाप्येवं विग्रहः करिष्यते, यथा शस्त्री श्यामा तद्वदियं देवदत्तेति, एवमपि देवदत्तायां श्यामेत्येतदपेक्ष्यं स्यात्" इत्युक्तम् । तत्र तस्यामेवेत्यस्य उपमेयायामेवेत्यर्थः । उपमानशब्दोऽपि सादृश्यमूलकाभेदाध्यवसायात् उपमेये एव वर्तते इति भाष्याशयः । सादृश्यनिर्वाहाय च तत्प्रयोजकस्य साधारणधर्मस्य श्यामत्वादेः घनश्यामो देवदत्त इत्यादौ तन्त्रादिना उपमाने उपमेये चोभयत्रान्वयः । तथाच उपमानश्यामघनाभिन्नः श्यामो देवदत्त इति बोधः । अत एव सूत्रे सामान्यवचनैरिति वचनपदमुपात्तम् । तेनच साधारणधर्मत्वेन बोधकता लभ्यते । साधारणधर्मत्वं च अनेकवृत्तिधर्मत्वम् । उभयत्र श्यामत्वादेरन्वयाभावे च अनेकवृत्तिधर्मत्वेन श्यामादिपदानां तद्बोधकत्वाभावात्समासो न स्यात् । तस्मात् सौत्रवचनपदस्वारस्येन उभयगतगुणवाचकत्वादिति उपमानानीतिसूत्रस्थभाष्याच्च उभयत्र साधारणधर्मान्वयः शाब्दः । तत्प्रयोज्यः सादृश्यान्वयस्तु आर्थः । नतु पूर्वपदस्य घनशब्दादेः लक्षणया तत्सदृशान्वयबोधः शाब्दः । तथासति उपमानत्वेन बोधकानि सामान्यधर्मविशिष्टोपमेयवचनैः समानाधिकरणैः समस्यन्ते इत्यर्थकेन "उपमानानि

नञ् द्विविधः। पर्युदासः प्रसज्यप्रतिषेधश्च। तत्रारोपविषयत्वं नञ्पर्य्युदासद्योत्यम्। आरोपविषयत्वद्योतकत्वञ्च नञः समभिव्याहृतघटादिपदानामारोपितप्र-

---

सामान्यवचनैः" इत्यनेन समासानापत्तेः। पूर्वपदस्य लक्षणया उपमेयपरत्वेन उपमानवाचकत्वाभावात्। वृत्तिविग्रहयोः समानार्थत्वाय तद्विग्रहवाक्येऽपि घन इव श्याम इत्यादौ लक्षणया तत्सदृशपरत्वस्यावश्यकत्वेन विग्रहवाक्यीयमुपमानवाचकत्वमपि नाश्रयितुं शक्यते। घनेन तुल्य इत्यादिकं तु न तद्विग्रहवाक्यम्। अन्यथा मृग्या तुल्या चपलेत्यतद्विग्रहवाक्यके मृगचपलेत्यत्र पुंवद्भावानापत्तिः। सामानाधिकरण्याभावात्। षष्ठीतत्पुरुषादावतिव्याप्तिवारणाय वृत्तौ विग्रहे च सामानाधिकरण्यस्य पुंवद्भावेऽपेक्षितत्वात्। वृत्तिविग्रहयोः समानार्थकत्वनियमभङ्गापत्तिश्च। तस्मात् "तस्यामेवोभयं वर्तते" इति भाष्यस्य पूर्वपदस्य उपमानवाचकत्वेऽपि सादृश्यमूलकाभेदाध्यवसायात् उपमेयपरत्वामत्येव पूर्वोक्तं तात्पर्यं समीचीनम्। ततश्च विग्रहे वृत्तौ च पूर्वपदस्य उपमानत्वविशिष्टार्थपरत्वात् उत्तरपदार्थसाधारणधर्मस्य च उभयत्रान्वयात् समासः, वृत्तिविग्रहयोः समानार्थकत्वं, साधारणधर्मान्वयप्रयोज्याभेदान्वयबोधश्च सिध्यन्ति। ततश्च मूले प्रदर्शितो बोधः उक्तसूत्रस्थभाष्यसम्मत इति संक्षेपः इति लघुमञ्जूषायां विस्तरः।

वृत्तिनिमित्तबोधकत्वे तात्पर्यग्राहकत्वम्। प्रवृत्तिनिमित्तं घटत्वब्राह्मणत्वादि। तस्मात् अब्राह्मण इत्यादौ आरोपितब्राह्मणत्ववान् क्षत्रियादिरिति बोधः। अत एवोत्तरपदार्थप्राधान्यं नञ्तत्पुरुषस्येति प्रवादस्सङ्गच्छते। अत एव च अतस्मै ब्राह्मणाय अतः शिव इत्यादौ सर्वनामकार्यम्। अन्यथा गौणत्वान्न स्यात्। प्रवृत्तिनिमित्तारोपस्तु सदृशे एव भवतीति पर्य्युदासः सदृशग्राहीति प्रवादः। पर्य्युदासे निषेधस्त्वार्थः। अन्यस्मिन्नन्यधर्मारोपस्तु आहार्य्यज्ञानरूपः। बाधकालिकमिच्छाजन्यं ज्ञानमेवाहार्य्यमिति वृद्धाः। सादृश्यादयस्तु प्रयोगोपाधयः, पर्य्युदासेत्वार्थिकार्थाः। तदुक्तं हरिणा,

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥ इति।

तत्सादृश्यं गर्दभेऽनश्वोऽयमित्यादौ। अभावस्तु प्रसज्यप्रतिषेधे वक्ष्यते। तदन्यत्वम् अमनुष्यं प्राणिनमानयेत्यादौ। तदल्पत्वम् अनुदरा कन्या इत्यत्र, अर्थात्स्थूलत्वनिषेधेनोदरस्याल्पत्वं गम्यते। अप्राशस्त्यं ब्राह्मणे अब्राह्मणोऽयमिति प्रयोगे। विरोधः असुरः अधर्म इति प्रयोगे।

पर्य्युदासस्तु स्वसमभिव्याहृतपदेन सामर्थ्यात्समस्त एव (प्रायः)। क्वचित्तु "यजतिषु येयजामहं करोति नानुयाजेषु" इत्यादौ घटः अपटो भवतीत्यर्थके घटो न पट इत्यादौ च समासविकल्पादसमासेऽपि। अत्रान्योन्याभावः फलितो भवति। प्रसज्यप्रतिषेधस्तु समस्तोऽसमस्तश्चेति द्विविधः। तत्र विशेष्यतया क्रियान्वयनियमात्सुबन्तेनासामर्थ्येऽपि अमूर्यलललाटयोरित्यादिज्ञापकात्समासः। तदुक्तम्,

प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ्। इति।

अत्र क्रियापदं गुणस्याप्युपलक्षणमिति बहवः। अत एव नञ्सूत्रे भाष्ये "प्रसज्यायं क्रियागुणौ ततः पश्चान्निवृत्तिं कुरुत" इत्युक्तम्। उदाहरणम् नास्माकमेकं प्रियमिति। एकप्रियप्रतिषेधे बहुप्रियप्रतीतिः। एवं न सन्देहः नोपलब्धिः इत्याद्युदाहरणं गुणस्य। सन्देहादीनां गुणत्वात्। क्रियोदाहरणम् अनचिच गेहे घटो नास्तीत्यादि। तस्य समस्तस्य तु अत्यन्ताभाव एवार्थः। असमस्तस्य तु अत्यन्ताभावोऽन्योन्याभावश्च। तादात्म्येतरसम्बन्धाभावोऽत्यन्ताभावः। तादात्म्यसम्बन्धाभावोऽन्योन्याभावो भेद

१ () एतन्मध्यस्थः पाठः बहुषु पुस्तकेषु नास्ति।

इत्यर्थः । अमूर्य्यंपश्या राजदाराः, गेहे घटो नास्ति, घटो न पटः इत्युदाहरणानि । प्रागभावप्रध्वंसाभावौ तु न नञ्द्योत्यौ ।

तत्रात्यन्ताभावो विशेष्यतया तिङन्तार्थ-क्रियान्वय्येव । नञर्थात्यन्ताभावविशेष्यकबोधे तिङ्समभिव्याहृतधातुजन्योपस्थितेः कारणत्वात् । तथा च घटो नास्तीत्यादौ घटकर्तृकसत्ताप्रति-योगिकोऽभाव इति बोधः । अत एवाहं नास्मि त्वं नासीत्यादौ घटौ न स्तो घटा न सन्तीत्यादौ च पु रुषवचनव्यवस्थोपपद्यते । अन्यथा युष्मदादेस्ति-

---

१ प्रकारतासम्बन्धेनेति शेषः । कारणतावच्छेदकश्च विशेष्यतासम्बन्धो बोध्यः । एतादृशकार्यकारणभा-वाङ्गीकारेणैव घटो न जायते इत्यादौ घटोत्पत्त्यभावादिः प्रतीयते न तु तदभावोत्पत्त्यादिः । एवं च अनुगतरूपेण कार्यकारणभावकल्पने लाघवात् सर्वत्रैव तथा बोधः अ-ङ्गीकार्यः ।

न क्रोधो नच मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥

इत्यत्र तु प्रत्येकं भवतीत्यस्य, भवन्तीत्यत्र च एते नेत्यस्याध्याहारेण अन्वय उपपादनीयः । एवमन्यत्रापि बोध्यम् ।

ङ्सामाननाधिकरण्याभावात् मदभावोऽस्तीत्यादाविव सा न स्यात् । असंदेह इत्यादौ तु आरोपितार्थकनञैव समासः । अत्यन्ताभावस्तु फलित एव । वायौ रूपं नास्तीत्यत्र तु तात्पर्यानुपपत्त्या रूपप्रतियोगिकात्यन्ताभावे लक्षणा । तेन वाय्वधिकरणिका रूपाभावकर्तृका सत्तेति बोधः । वस्तुतस्तु समनियताभावैक्यमाश्रित्य फलितार्थ एवायम् । अरूपमस्तीत्यर्थकं वा तत् । एतेनात्यन्ताभावप्रकारकक्रियाविशेष्यको बोध इति तार्किकोक्तमपास्तम् ॥

नन्वेवं घटसत्तारूपोऽर्थः प्रथमं बुद्धो नञा निवर्तयितुमशक्यः, सतो निषेधायोगात्, असतस्त्वसत्त्वादेव निवृत्तिसिद्ध्या निषेधो व्यर्थः । तदुक्तम्,

सतां च न निषेधोऽस्ति सोऽसत्सु च न विद्यते ।
जगत्यनेन न्यायेन नञर्थः प्रलयं गतः ॥

---

१ रूपाभावस्यैव बोधविषयत्वेन तात्पर्यविषयत्वादिति भावः ।

२ रूपसत्ताऽभावविषयके शाब्दबोधे जाते तत्समनियतो रूपाभावोऽर्थादेव प्रतीयते इति भावः ।

३ अब्राह्मण इत्यादाविव आरोपितरूपत्ववान् यः वायुवृत्तिस्तत्कर्तृका सत्तेत्येव शाब्दबोधः । तदभाववबोधश्चात्रापि आर्थ एवेति बोध्यम् ।

इति चेन्न । बौद्धो हि शब्दो वाचकः बौद्ध एवार्थो वाच्य इत्युक्तत्वात् बुद्धिसतोऽप्यर्थस्य नञा बाह्यसत्तानिषेधात् । बुद्धौ सन्नपि घटो बहिर्नास्तीत्यर्थात् । न च घटास्तिपदाभ्यां या घटविषयाऽस्तिबुद्धिर्जाता सा नञा निवर्त्यते किं बौद्धार्थस्वीकारेणेति वाच्यम् । बुद्धेश्शब्दावाच्यत्वेन नञा तन्निषेधायोगात् । एतेन बौद्धार्थमस्वीकुर्वन्तो नञर्थबोधाय कष्टकल्पनां कुर्वन्तस्तार्किकाः परास्ताः ।

घटो न पट इत्यत्र घटपदस्य घटप्रतियोगिकभेदाश्रये अप्रसिद्धा शक्तिरेव लक्षणा नञ्पदं तात्पर्य्यग्राहकम् । तात्पर्य्यग्राहकत्वं द्योतकत्वमेवेत्युक्तम् । अत एवान्योन्याभावबोधे प्रतियोग्यनुयोगिपदयोः समानविभक्तिकत्वं नियामकमिति वृद्धोक्तं सङ्गच्छते ।

यत्तु घटपदं घटप्रतियोगिके लाक्षणिकं नञ्पदं तु भेदवति, अतो घटप्रतियोगिकभेदवान्पट इति बोध इति तार्किकैरुक्तम् । तन्न । भेदवति नञर्थे भेदस्यैकदेशत्वात् तत्र घटार्थानन्वयापत्तेः । पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति न्यायात् । पदद्वये लक्षणास्वीकारे गौरवाच्च । भाष्यमते लक्षणाया निपातानां वाचकत्वस्य च स्वीकाराभावादिति संक्षेपः ।

एवशब्दस्यार्थोऽवधारणमसम्भवश्च । एवे चानियोगे इति वार्तिके नियोगोऽवधारणं तदभावोऽसम्भव इति कैयटोक्तेः । अनयोरर्थयोरेवशब्दो द्योतकः । अत एव तं विनापि तदर्थप्रतीतिः सर्वं वाक्यं सावधारणमिति वृद्धोक्तं सङ्गच्छते । लवणमेवासौ भुङ्क्ते इत्यादौ प्राचुर्यार्थकस्य, घट एव प्रसिद्ध इत्यादावप्यर्थकस्य, केव भोक्ष्यसे इत्यादावसम्भवार्थकस्य च तस्य सत्त्वमित्यालङ्कारिकाः ।

तच्चावधारणं त्रिविधम् । विशेष्यसङ्गतैवकारेऽन्ययोगव्यवच्छेदरूपं, विशेषणसङ्गतैवकारेऽयोगव्यवच्छेदरूपं, क्रियासङ्गतैवकारे ऽत्यन्तायोगव्यवच्छेदरूपम् । विशेष्ये, पार्थ एव धनुर्धरः । पार्थेतरावृत्ति यद्धनुर्धरत्वं तादृशधनुर्धरत्ववान् पार्थ इति बोधः इत्यन्यस्मिन्धनुर्धरत्वसम्बन्धव्यवच्छेदः । विशेषणे, शङ्खः पाण्डुर एव । अयोगः सम्बन्धाभावः तस्य व्यवच्छेदो निवृत्तिः, द्वाभ्यां निषेधाभ्यां प्रकृतार्थदार्ढ्यबोधनेनाव्यभिचरितपाण्डुरत्वगुणवान् शङ्ख इति बोध इत्ययोगव्यवच्छेदः । न तु नील इति हि फलति । क्रियायां, नीलं सरोजं भवत्येव । अत्यन्तोऽतिशयितोऽयोगः सम्बन्धाभावस्तस्य व्यवच्छे-

दोऽभावः । तथा च कदाचिन्नीलत्वगुणवदभिन्नं यत्सरोजं तत्कर्तृका सत्तेति बोधः । कदाचिदन्यादृशगुणसंयुक्तमित्यपि गम्यते इत्यत्यन्तायोगव्यवच्छेदः । क्वचिदेवशब्दं विनापि नियमप्रतीतिः । तदुक्तं भाष्ये—अभक्ष्यो ग्राम्यकुक्कुट इत्युक्ते गम्यते एतत् आरण्यो भक्ष्य इति । सर्वं वाक्यं सावधारणमिति न्यायात् । आलङ्कारिका अपि परिसङ्ख्याऽलङ्कारप्रकरणे प्रमाणान्तरेण प्राप्तस्यैव वस्तुनः पुनः शब्देन प्रतिपादनं प्रयोजनान्तराभावात् स्वतुल्यान्यव्यवच्छेदं गमयतीति । भागवतेऽपि, ।

लोके व्यवायामिषमद्यसेवा
नित्यास्तु जन्तोर्न हि तत्र चोदना ।
व्यवस्थितिस्तेषु विवाहयज्ञ—
सुराग्रहैरासु निवृत्तिरिष्टा ॥ इति ।

व्यवायो मैथुनम्, आमिषं मत्स्यादि, मद्यम्—एतेषां सेवा जन्तोः प्राणिमात्रस्य नित्या रागतः प्राप्ताः । अतस्तत्र चोदना विधिर्नास्ति । नन्वेवम् "ऋतौ भार्यामुपेयात्" "हुतशेषमभक्षयेत्" "सौत्रामण्यां सुराग्रहान् गृह्णाति" इत्येतेषां वैयर्थ्यम् । भार्यां विवाहिताम् । तत्राह व्यवस्थितिरिति । तेषु पुनः

प्रापणामित्यर्थः । नियमस्यान्यनिवृत्तिफलकत्वादाह आप्तु निवृत्तिरिष्टेति । अन्योऽप्वेति शेषः । तदुक्तम्,

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति गीयते ॥ इति ।

स्वर्गकामो ऽश्वमेधेन यजेतेति विधिः । क्षुत्प्रतिघातो यद्यपि शशकादिमांसैः श्वादिमांसैश्च भवति तथापि शशकादिमांसैरेव कर्त्तव्य इति परिसङ्ख्यायते पञ्च पञ्चनखा भक्ष्या इत्यनेन । नखविदलनावहननाभ्यां व्रीहेर्निस्तुषीकरणं प्राप्तम्, तत्रावहननेन निस्तुषीकरणं पुण्यजनकमिति व्रीहीनवहन्तीत्यनेन नियम्यते । यद्यपि परिसङ्ख्यायां नियमे च स्वार्थहानिः प्राप्तबाधः परार्थकल्पनाचेति दोषत्रयं तथाप्यनन्यगत्या स्वीक्रियते इति वृद्धाः । पञ्च पञ्चनखा इत्यस्य नियमत्वेन भाष्ये व्यवहृतत्वात् अन्यनिवृत्तिरूपफलैक्याच्च नियमपदेन परिसङ्ख्याऽपि व्याकरणे गृह्यतइति संक्षेपः ।

अथ दशलकारादेशार्थाः ।

यद्यपि लकाराणामेवार्थनिरूपणं तार्किकैः कृतं तथापि उच्चारित एव शब्दोऽर्थप्रत्यायको नानुच्चारित इति भाष्याल्लोके तथैवानुभवाच्च तदादेशतिङामर्थो

निरूप्यते। वर्तमाने लडित्यादिविधायकलःकर्मणीति-शाक्तिग्राहकसूत्राणामादेशार्थं स्थानिन्यारोप्य प्रवृत्तिः। तत्र सङ्ख्याविशेष–कालविशेष–कारकविशेष–भावा-लादेशमात्रस्यार्थाः । तथाहि । लडादेशस्य वर्त-मानकालः, शबादिसमभिव्याहारे कर्ता, यक्चिण्-समभिव्याहारे भावकर्म्मणी, उभयसमभिव्याहारे एकत्वादिसङ्ख्या चार्थः । तदाह—

फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः ।
व्यापारे शपूश्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम् ॥
फलव्यापारौ तु धात्वर्थावित्युक्तमेव ।

तत्र तिङ्समभिव्याहारे तदर्थसङ्ख्या तदर्थकारके विशेषणम् । कालस्तु व्यापारे । तदाह—

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥

तिङर्थः कर्ता व्यापारे, कर्म च फले विशेषणम् । क्रियाप्रधानमाख्यातमिति यास्कोक्तौ क्रियापदं कर-णव्युत्पत्त्या व्यापारपरं कर्मव्युत्पत्त्या फलपरमिति बोध्यम् । तथाच ग्रामं गच्छति चैत्र इत्यत्रैकत्वाव-च्छिन्नचैत्राभिन्नकर्तृको वर्तमानकालिको ग्रामाभिन्न-कर्मनिष्ठो यस्संयोगः तदनुकूलो व्यापारः, ग्रामो

गम्यते मैत्रेणेत्यत्र तु मैत्रकर्तृकवर्त्तमानकालिकव्यापारजन्यो ग्रामाभिन्नकर्म्मनिष्ठः संयोग इति च बोधः। वर्तमानकालत्वं च प्रारब्धापरिसमाप्तक्रियोपलक्षितत्वम्।

लिट्तिङस्तु भूतानद्यतनकालः परोक्षत्वं चाधिकोऽर्थः। शेषं लड्वत्[1]। परोक्षत्वं च कारके[2] विशेषणं न तु क्रियायां, तस्या अतीन्द्रियत्वेन[3] लिट्सूत्रे भाष्ये प्रतिपादनात् व्यभिचाराभावात्। कृभ्वाद्यनुप्रयोगस्थले कृभ्वसां क्रियासामान्यमर्थः। आम्प्रकृतेस्तु तत्तत्क्रियाविशेषः। सामान्यविशेषयोरभे-

---

१ शेषं लड्वदिति। शेषं संख्याकारकं लड्वदित्यर्थः। एवमुत्तरत्र सर्वत्र बोध्यम्।

२ कारके, क्रियाविष्टे इति शेषः। तेन गमनादिक्रियानाविष्टस्य देवदत्तस्य दर्शनेऽपि न "देवदत्तो जगाम" इत्यादिप्रयोगानुपपत्तिरिति बोध्यम्।

३ अतीन्द्रियत्वेनेति। न च तस्या अतीन्द्रियत्वे पश्य मृगो धावतीत्यत्र धावनस्य दर्शनविषयत्वानुपपत्तिरिति वाच्यम्। तत्र दृशेर्ज्ञानसामान्यार्थकत्वाङ्गीकारात्। शीघ्रं शीघ्रं देशान्तरसंयोगदर्शनेन च धावनमनुमीयते इति तस्यानुमितिविषयत्वमेव पश्य मृगो धावतीत्यत्र बुध्यते इति भावः।

दान्वयः । अकर्मकप्रकृतिकामन्तानुप्रयुक्तकृभ्वसामकर्मिकैव क्रिया । वस्तुतस्तु अनुप्रयुक्तानां कृभ्वसां फलशून्यक्रियासामान्यवाचकत्वमेव । सकर्मकाकर्मकत्वव्यवहारस्तु आम्प्रकृतिभूतधातोरेवेति निष्कर्षः । एवञ्च एधाञ्चक्रे चैत्र इत्यत्र एकत्वावच्छिन्नपरोक्षत्वावच्छिन्नचैत्रकर्तृका भूतानद्यतनकालाधिकरणिका वृद्ध्यभिन्ना क्रियेति बोधः । परोक्षत्वं च साक्षात्कृतमित्येतादृशविषयताशालिज्ञानाविषयत्वम् । भूतानद्यतनत्वं च अद्यतनाष्टप्रहरीव्यतिरिक्तत्वे सति भूतत्वम् । लुडादे-

---

१ साक्षात्कृतमित्येतादृशविषयताशालिज्ञानाविषयत्वमिति । अनेन "सुसोऽहं किल विललाप" इत्यादौ स्वकृतविलापस्य स्वप्रत्यक्षत्वेऽपि परोक्षत्वमुपपन्नम् । तत्काले साक्षात्करोमि इत्येवं साक्षिभास्यत्वेऽपि निद्रादिदोषात् तदंशे संस्कारानुदयेन साक्षात्कृतत्वावच्छिन्नविषयताशालिज्ञानाविषयत्वस्य सुवचत्वात् । अतएव साक्षात्करोमि इति त्यक्त्वा साक्षात्कृतमित्युपात्तमिति भावः ।

२ अद्यतनाष्टप्रहरीव्यतिरिक्तत्वे सतीति । अद्यतनानद्यतनविभागश्च त्रेधा । अतीताया रात्रेः पश्चार्धेनागामिन्याः पूर्वार्धेन च सहितो दिवसोऽद्यतनस्तद्भिन्नोऽनद्यतन इत्येकः प्रकारः । अतीताया रात्रेः अन्त्यतृतीयभागेन आगामिन्या आद्यतृतीयभागद्वयेन च सहितो दिवसोऽद्यतनः, तद्भिन्नोऽनद्यतन इति द्वितीयः । उदयादुदयं याव-

शस्य तु भविष्यदनद्यतनार्थोऽधिकः। शेषं लड्वत्। भविष्यत्त्वं च वर्त्तमानप्रागभावप्रतियोगिक्रियोपलक्षितत्वम्। लृट्तिङस्तु भविष्यत्सामान्यमर्थः। लेट्तिङस्तु विध्यादिरर्थः। छन्दसि लिङर्थे लेडिति सूत्रात्। लट्प्रक्रियातो लेटोऽडाटाविति विशेषः। भवाति भवतीतिप्रयोगदर्शनात्। लोट्तिङस्तु विध्यादिरर्थः। तत्राधीष्टं[1] सत्कारपूर्वको व्यापारः, आगच्छतु भवान् जलं गृह्णातु इत्यादौ। सम्प्रश्नोऽनुमतिः, गच्छति चेत् भवान् गच्छत्वित्यादौ। लङादेशस्य तु भूतानद्यतनत्वमधिकोऽर्थः। शेषं लड्वत्। लिङादेशस्य तु विध्यादिरर्थः। तत्र विध्यादिचतुष्टयानुस्यूतप्रवर्त्तनात्वेन चतुर्णां वाच्यता लाघवात्। तदुक्तं हरिणा,

अस्ति प्रवर्त्तनारूपमनुस्यूतं चतुर्ष्वपि।
तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया॥इति।

दद्यतनः, तद्भिन्नोऽनद्यतन इति तृतीयः। अत्र च देशाचारादू व्यवस्था ज्ञेया।

१ अधीष्टमिति। बहुषु पुस्तकेषु अधीष्ट इति पुंलिङ्गपाठो दृश्यते। तत्र भावक्तान्तादर्शाद्यज् बोध्यः। तत्र भावक्तान्तस्य सत्कारोऽर्थः, तत्पूर्वको व्यापारश्च अच्प्रत्ययान्तार्थः।

प्रवर्त्तनात्वं च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वं, तच्चेष्टसाधनत्वस्यैवेति तदेव लिङर्थः । न तु कृतिसाध्यत्वं, तस्य यागादौ लोकत एव लाभादित्यन्यलभ्यत्वात् । न च बलवदनिष्टाननुबन्धित्वं, द्वेषाभावेनान्यथासिद्धत्वात् इत्यन्यत्र विस्तरः । लुङादेशस्य तु भूतसामान्यमर्थः । भूतत्वं च वर्तमानध्वंसप्रतियोगिक्रियोपलक्षितत्वम् । लृङादेशस्य तु क्रियातिपत्तौ गम्यमानायां हेतुहेतुद्भावे च गम्यमाने भूतत्वं भविष्यत्त्वञ्चार्थः । आपादना तु गम्यमाना । भूते, एधश्चेदलप्स्यत ओदनमपक्ष्यत् । भविष्यति, सुवृष्टिश्चेदभविष्यत्सुभिक्षमभविष्यदिति सङ्क्षेपः

अथ नैयायिकानां मते सङ्क्षेपालुकाराणामर्थो निरूप्यते । तत्र लडादिलृङन्ता दश लकाराः । तत्र लकारस्य कर्त्ता कालः सङ्ख्या चेति त्रयोऽर्थाः । तत्र कर्तेति पातञ्जलाः । लः कर्म्मणिचेति सूत्रे चकारेण कर्तुः परामर्शात् । कर्तृस्थाने व्यापार इति भाट्टाः । यत्न इति नैयायिकाः । युक्तं चैतत् । व्यापारताद्यपेक्षया लाघवेन यत्नत्वस्यैव शक्यतावच्छेदकत्वात् । शक्तितावच्छेदकञ्च लकारसाधारणं ल-

त्वमेव । भवतीत्यादौ चादेशेनादेशिनो लस्यैव स्मरणादन्वयधीः । आदेशेषु बहुषु शक्तिकल्पने गौरवात् । तदस्मरणे च शक्तिभ्रमादेवान्वयधीः । चैत्रो गन्ता गतो ग्राम इत्यादौ सामानाधिकरण्यानुरोधेन यथायथं कर्तृकर्मणी कृद्वाच्ये । नचैवं लटः शतृशानचावित्यनेन शतृशानचोरादेशत्वात्कथं कर्त्तरि शक्तिः। आदेशिशक्त्या निर्वाहएवादेशशक्त्यकल्पनात् । चैत्रः पचन्नित्यादौ सामानाधिकरण्यानुरोधादादेशिशक्त्याऽनिर्वाहादत्रादेशेऽपि शक्तिः ।

इयांस्तु विशेषः । लत्वेन यत्ने शक्तिः आत्मनेपदत्वेन फले । मैत्रेण गम्यते ग्राम इत्यादौ मैत्रवृत्तिकृतिजन्यगमनजन्यफलशाली ग्राम इत्यन्वयबोधात् । कृतिश्चात्र तृतीयार्थः । जन्यत्वं संसर्गः । मैत्रः कृतौ विशेषणं, सा च गमने, तच्च फले, तच्च ग्रामे । ग्रामं गच्छति मैत्र इत्यत्र तु ग्रामवृत्तिफलजनकगमनानुकूलकृतिमान्मैत्र इति बोधः । फलं च द्वितीयार्थः । जनकत्वं संसर्गः । ग्रामश्चात्र फले विशेषणं, तद् गमने, तच्च कृतौ, सा मैत्रे इति विशेष्यविशेषणभावभेदेनैव कर्मकर्तृस्थलीयबोधयोर्विशेषः । तावन्तः पदार्थास्तूभयत्रैव

तुल्याः । मैत्रेण ज्ञायते इष्यते क्रियते घट इत्यादौ तु वृत्तिस्तृतीयाया, विषयता त्वाख्यातस्यार्थः । मैत्रवृत्तिज्ञानविषयो घट इति बोधः । घटं जानाति मैत्र इत्यादौ तु विषयता द्वितीयाया, आश्रयत्वं चाख्यातस्यार्थः । घटविषयकज्ञानाश्रयो मैत्र इति बोधः ।

कालश्चातीतवर्त्तमानानागतात्मा यथायथं लडादेरर्थः । लटो भवतीत्यादौ वर्त्तमानत्वं, लङ्लुङ्लिटाम् अभवत् अभूत् बभूवेत्यादौ भूतकालः, लुट्लृटोर्भविता भविष्यतीत्यादौ भविष्यत्कालः । लिङ्लोट्लेटां भवेत् भवतु आग्नेयोऽष्टाकपालो भवतीत्यादौ विधिः । सङ्ख्या च केवलार्थः ।

लेटस्तु छन्दस्येव प्रयोगः । तत्र दीर्घत्वमपि विकल्पेन, भवति भवातीति दर्शनात् । तत्र व्यापारादिबोधकेन लटा वर्त्तमानत्वं व्यापारादावेव बोध्यते । पचतीत्यादितो वर्त्तमानपाकानुकूलव्यापारवानिति बोधात् । एवमन्यत्रापि ।

व्यापारबोधकाख्यातजन्यवर्त्तमानत्वप्रकारकबोधे आख्यातजन्यव्यापारोपस्थितेर्हेतुत्वकल्पनान्नातिप्रसङ्गः ।

व्यापाराबोधकज्ञाधात्वादिसमभिव्याहृताख्यात-जन्यवर्त्तमानत्वप्रकारकबोधे तु तादृशधातुजन्यो-पस्थितिर्हेतुः । कार्यतावच्छेदिका च प्र-त्यासत्त्या विषयतैवेति नातिप्रसङ्गः । जानाति-इच्छति यतते इत्यादौ वर्त्तमानत्वाश्रयज्ञानाश्रयत्वा-दिबोधस्यैवानुभविकत्वात् ।

तत्र लटा शक्त्या वर्त्तमानत्वं लक्षणयाऽऽश्रयत्वं बोध्यतइति विशेषः । लटा स्वाधिकरणकालोपाधि-स्पन्द एव वर्त्तमानः प्रत्याय्यते । वर्त्तमानसामीप्ये विहितेन तु स्वानधिकरणसमीपवर्त्ती तादृशकालः । तत्रापि शक्तिर्लक्षणा वेत्यन्यदेतत् ।

नन्वेकपदोपस्थितयोः कृतिवर्त्तमानत्वयोः कथं मिथोऽन्वयः । तत्पदजन्यशाब्दबोधे पदान्तरजन्यो-पस्थितेर्हेतुत्वात् । कार्यतावच्छेदिका च प्रत्यासत्तिः प्रकारता । कारणतावच्छेदिका च विशेष्यतेति । अन्यथा हरिपदार्थयोः, दण्डेनेत्यादौ च करण-त्वैकत्वयोर्मिथोऽन्वयापत्तेः । मैवम् । तत्तत्पदान्यत्व-स्योक्तव्युत्पत्तौ प्रवेशात् । कथमन्यथैवकारार्थयोर-न्ययोगव्यवच्छेदयोर्मिथोऽन्वयः ।

घटो नश्यतीत्यादौ वर्त्तमानोत्पत्तिकत्वं प्रति-

योगित्वं च लडर्थः । आद्यं नाशे प्रकारः, द्वितीयं घटे प्रकारः । वर्त्तमानोत्पत्तिकनाशप्रतियोगी घट इति बोधस्यानुभविकत्वात् । अत्र च वृत्तिद्वयस्य युगपद्बोधकत्वं सर्वैरेषितव्यम् । तादृशोत्पत्तिकत्वप्रतियोगित्वयोरर्थयोर्युगपदेव बोधात् । नच तादृशोत्पत्तिकत्वमेवार्थोऽस्तु । धात्वर्थस्य नाशस्य घटे प्रातिपदिकार्थे साक्षादन्वयासम्भवात् । न च प्रतियोगित्वमेवार्थोऽस्त्विति वाच्यम् । चिरनष्टेऽपि नश्यतीति प्रसङ्गात् ।

एतेनात्र वर्त्तमानत्वमेवार्थो नोत्पत्तिरित्यपास्तम् ।

केचित्तु लत्वमेवात्र प्रतियोगित्वस्य वृत्त्यवच्छेदकं लट्त्वन्तु तादृशोत्पत्तिकत्वस्य । एकधर्मावच्छिन्नवृत्तिद्वयस्यैव न युगपद्बोधकत्वम् । अन्यथा दण्डेनेत्यादौ करणत्वैकत्वयोर्बोधो न स्यात् इत्याहुः । अन्ये तु नश्यतीत्यादौ लटा नाशसामग्र्येव बोध्यते । तेन न चिरनष्टे नश्यतीति प्रसङ्गः । अतएव विनश्यत्ता विनाशसामग्रीसान्निध्यमित्याहुः प्रामाणिकाः ।

आख्यातात्क्रियाविशेष्यको बोध इति वैयाकरणाः भाट्टाश्च । आद्यनये धात्वर्थः क्रिया । चैत्रस्तण्डुलं पचतीत्यादितश्चैत्रकर्तृकतण्डुलकर्मकपाक

इति धीः । अन्त्यनये भावना क्रिया प्रत्ययार्थः । चैत्रीयपाककरणिका तण्डुलकर्मिका भावनेति बोधः ।

प्रथमान्तार्थविशेष्यक एव बोधः । ओदनकर्मकपाकानुकूलकृतिमांश्चैत्र इति बोध इति नैयायिकाः । द्वितीयाद्यर्थकर्मकरणत्वादेः क्रियायामेव सर्वमतेऽन्वयः ।

लङस्तु शक्यो ह्योऽनद्यतनकालः । लुङस्तु भूतसामान्यम् । भूतत्वं च वर्त्तमानध्वंसप्रतियोग्युत्पत्तिकत्वं, न तु तादृशप्रतियोगित्वमेव । चिरोत्पन्नेऽपि पूर्वेद्युरभवदितिप्रत्ययापत्तेः । नष्ट इत्यादौ नाशे तदन्वयासम्भवाच्च । उत्पत्तेस्तु देशकालादावन्वयान्न दोषः । अभवदित्यादौ तु धातुनोत्पत्तिः प्रत्याय्यते, नष्ट इत्यादौ तादृशोत्पत्तिकत्वं प्रत्ययेनेति विशेषः । लिटस्तु भूतकाल इव परोक्षत्वमप्यर्थः । अहं चकारेत्यादिप्रयोगादर्शनात् । ननु चैवं णलुत्तमो वेति ज्ञापकात् उत्तमपुरुषस्तत्र स्यादिति वाच्यम् । सुप्तोऽहं किल विललाप मत्तोऽहं किल विचचारेत्यादौ चित्तविक्षेपादिना पारोक्ष्यमुपपाद्य तत्र सूत्रसार्थक्यसम्भवात् । तत्र च परोक्षत्वेन पारोक्ष्यसादृश्ये तात्पर्यम् । चक्रे सुबन्धुरिति तु न लिट्प्रयोगोऽपि तु

तिङन्तप्रतिरूपको निपातः।

लुङ्लृटोस्तु भविष्यत्कालः। भविष्यत्त्वं वर्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वम्। उत्पत्तौच देशविशेषः कालविशेषश्चाधिकरणत्वेनान्वेति। गृहे घटो भविता अद्य घटो भविष्यतीत्यादौ धातुनोत्पत्तिः प्रत्याय्यते, वर्तमानप्रागभावप्रतियोगित्वमाश्रयत्वं च प्रत्ययेन। गृहाधिकरणकवर्त्तमानप्रागभावप्रतियोग्युत्पत्त्याश्रयो घटः, अद्यतनप्रागभावप्रतियोग्युत्पत्त्याश्रयो घट इत्यन्वयबोधात्। वर्त्तमानप्रागभावप्रतियोगित्वमात्रस्य लुडाद्यर्थत्वे श्वो गृहे समुत्पद्य परश्वः प्राङ्गणं गमिष्यति मैत्रे परश्वः प्राङ्गणे मैत्रो भविष्यतीति प्रसङ्गः।

केचित्तु देशविशेषः कालविशेषश्च प्रागभावे प्रतियोगिनि चान्वेति। परश्वः प्राङ्गणे मैत्रो भविष्यतीत्यस्य परश्वोवृत्तिः प्राङ्गणवृत्तिर्यः प्रागभावस्तत्प्रतियोग्युत्पत्त्याश्रयः परश्वोवृत्तिः प्राङ्गणवृत्तिर्मैत्र इति बोधः। तेन नोक्तातिप्रसङ्गः। एतेन श्वोभाविनि घटे अद्य भविष्यतीति प्रसङ्गो निरस्त इत्याहुः॥

नङ्क्ष्यतीत्यादौ वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वं प्रतियोगित्वं च प्रत्ययार्थः। श्वो घटो नङ्क्ष्यती-

त्यादौ श्वोवृत्तिः वर्त्तमानप्रागभावप्रतियोगिनी योत्पत्तिस्तदाश्रयनाशप्रतियोगी घट इत्यन्वयबोधः। यत्त्वत्र वर्त्तमानप्रागभावप्रतियोगित्वमेव प्रत्ययार्थ इति तन्न। श्वोभाविनाशके घटे अद्य नङ्क्ष्यतीति प्रसङ्गात्।

पक्ष्यतीत्यादौ आद्यपाकव्यक्तिप्रागभावगर्भमेव भविष्यत्त्वम्, पक्वानित्यादौ चरमपाकव्यक्तिध्वंसगर्भमेव भूतत्वं भासते। तत्तत्समभिव्याहारस्य तादृशबोधे हेतुत्वात्। तेन पाकमध्ये कस्याश्चित्पाकव्यक्तेरनुत्पादेऽपि कस्याश्चिदतीतत्वेऽपि न पक्ष्यति पक्वानित्यादिप्रयोगः॥

लिङो विधिराशीश्चार्थः। यजेतेत्यादौ विधिः, आशीस्तु भूयादित्यादौ। सा च शुभाशंसनं तदिच्छेति यावत्। लोटस्तु विधिरनुमतिर्वा। गच्छत्वित्यत्रानुमतिविषयगमनानुकूलकृतिमानिति बोधस्यानुभविकत्वात्।

विधिः प्रवर्त्तनेति भाट्टाः। लिङ्[2]निष्ठो व्यापारः

१ श्वोभावी नाशो यस्य तस्मिन्नित्यर्थः।

२ यद्यपि लोके आज्ञादिरूपो ऽभिप्रायविशेष एव प्रवर्तना तथापि वेदे पुरुषाभावाच्छब्दनिष्ठ एव स आश्रीयते इति भावः।

पदार्थान्तरं, लिङ्पदज्ञानमेव वा । तस्य प्रवर्तनात्वेनै[1] ज्ञानं शब्दाधीनप्रवृत्तौ कारणम् । लिङ्श्रवणे आचार्यो मां प्रवर्तयतीति ज्ञानाद्धवानयनादौ प्रवृत्तेः । आचार्यनिष्ठप्रवर्तना त्वभिप्रायविशेष एवेत्याहुः । तन्न । स्तनपानादिप्रवृत्ताविष्टसाधनताज्ञानस्य हेतुतायाः आवश्यकत्वात् तत एवोपपत्तौ प्रवर्त्तनाज्ञानस्य हेतुत्वे मानाभावात्[2] । स्वर्गकामो यजेतेत्यादौ प्रवर्त्तना-[3]

१ क्लेशेन लिङ्पदज्ञानेनैवोपपत्तौ पदार्थान्तररूपव्यापारकल्पनाया अनुचितत्वात् । तथाहि । प्रवृत्तिहेतुव्यापारः प्रवर्तना । विधिशब्दो हि पुरुषप्रवृत्तिरूपार्थभावनां दशलकारसाधारणाख्यातत्वेन बोधयति, ज्ञातैवच सा अनुष्ठातुं शक्यतइति भवति विधिशब्दस्य ज्ञानद्वारा प्रवृत्तिहेतुत्वम् । तस्य च प्रवृत्तिज्ञानद्वारा प्रवृत्तिहेतुत्वं "विधिशब्दः प्रवृत्तिबोधहेतुशक्तिमान्" इत्येवं ज्ञातस्यैवेति तादृशशक्तिमत्त्वेन ज्ञानमेव तस्य प्रवृत्तिहेतुर्व्यापार इति स एव प्रवर्तनाख्यां लभते । ज्ञानातिरिक्तव्यापारकल्पने मानाभावादिति भावः ।

२ प्रवर्तनात्वेनैव ज्ञानस्य प्रवृत्तिं प्रति कारणत्वान्न लोकवेदयोरननुगमः । लिङ्श्रवणे अयं मां प्रवर्तयतीतिप्रतीतिसाक्षिकस्य प्रवर्तनात्वस्य आज्ञादिष्विव शब्दव्यापारेऽपि सत्त्वादिति भावः ।

३ इष्टसाधनत्वमपि प्रेरणात्वेनैव शक्यं, न स्वरूपतः ।

विषयो यागकरणिका स्वर्गकर्मिका भावनेति बोधस्य

प्रेरणात्वापेक्षया तस्य गुरुत्वात् । इष्टत्वांशं विहाय साधनत्वमात्रस्य वाच्यत्वेच्च आख्यातत्वांशोपस्थितप्रवृत्त्या सह समानाभिधानश्रुत्या साधनत्वान्वयसम्भवे पदान्तरोपस्थापितस्वर्गेण सह समभिव्याहाररूपवाक्येन तदन्वयासम्भवात् प्रवृत्तिसाधनत्वरूपप्रेरणात्वेएव पर्यवसानमिति इष्टसाधनत्वं न पदार्थः । किन्तु वाक्यार्थः । तथाहि । प्रवर्तनाविषयीभूताऽर्थभावना किम्भावयेदिति भाव्याकाङ्क्षायां समानपदोपात्तमपि धात्वर्थमपुरुषार्थत्वाद्भाव्यतयाऽन्वययोग्यं विहाय भिन्नपदोपात्तमन्यविशेषणमपि स्वर्ग कामपदसम्बन्धात् पुरुषार्थतयाऽवगतं साध्यत्वान्वययोग्यं भाव्यत्वेनाश्रयति । अपुरुषार्थकर्मिकायास्तस्याः प्रवर्तनासाध्यत्वानुपपत्तेः । एवञ्च स्वर्गभावनासाधनत्वात्स्वर्गरूपेष्टसाधनत्वमपि प्रवर्तनायाः लिध्यति । पुरुषप्रवृत्तिरूपार्थभावना च यागव्यापारं विना स्वर्गं साधयितुं नालमिति यागस्य स्वर्गसाधनत्वमाक्षिप्यते । ननु यागस्य स्वर्गसाधनत्वं वाक्यप्रमाणगम्यम् । यजधातोरकर्मकत्वेन तत्र द्वितीयान्तस्वर्गपदार्थस्य कर्मत्वेनान्वययोगात् । तस्मात् फलसाधनत्वस्य प्रवर्तनात्वेनैव वाच्यतेत्यादिकं मण्डनमतसमर्थनं वैयाकरणादिसंमतमन्यतो विस्तरेणावगन्तव्यम् । मानाभावादिति तु नैयायिकमतनिरूपणप्रस्तावे ग्रन्थकारेणोक्तमिति तत्कथनं वैयाकरणसंमतमिति न भ्रमितव्यम् ।

परैरभ्युपगमात् प्रवर्तनाविषयत्वमात्रज्ञानात् प्रवृत्त्यनुपपत्तेरावश्यकस्वर्गसाधनत्वादिज्ञानादेव तत्र प्रवृत्तेः। कार्यं विधिरिति प्राभाकराः । स्वर्गकामो यजे-

१ प्राभाकरा इति । ते हि प्रवृत्तिं प्रति कार्यताज्ञानस्य कारणत्वमभ्युपगच्छन्ति । तथाहि । कार्यताज्ञानं द्विविधम्-मयेदं कर्तुं शक्यते इत्येवंरूपमेकम्, मयेदमवश्यं कार्यमित्येवंरूपं द्वितीयम् । तत्राद्यं पदार्थयोग्यतागम्यमिति न प्रवृत्तौ कारणम् । द्वितीयमिष्टसाधनत्वादिज्ञानजन्यमिति चिकीर्षाद्वारा प्रवृत्तिहेतुः । अत एव इष्टसाधनत्वेनाज्ञाते मध्वन्नभोजने, बलवदनिष्टसाधनत्वेन ज्ञाते विषसंयुक्तान्नभोजनेच न प्रवृत्तिः । निरुक्तस्य कार्यताज्ञानस्य इष्टसाधनत्वज्ञानाद्यभावेऽजननात् । प्रवृत्तिं प्रति इष्टसाधनत्वज्ञानादीनां त्रयाणां कारणत्वकल्पनापेक्षया लाघवेन उक्तकार्यताज्ञानस्यैव चिकीर्षाद्वारा कारणत्वकल्पनं समुचितमेव । प्रकरणादिहेतुकतात्पर्यज्ञानस्य फलभूतशाब्दबोधकारणत्वकल्पनवत् । तस्मात् कार्यताज्ञानमेव प्रवर्तकमिति तदेव लोके विध्यर्थः ।

वेदे तु कार्यं विध्यर्थः । तृप्तिकामः पचेदित्यादौ लोके पाकादौ तृप्तिरूपफलसाधनत्वस्य लौकिकप्रमाणगम्यत्वेन तेन रूपेणावगते पाकादौ काम्यसाधनताज्ञानाधीनकार्यताज्ञानवत्त्वरूपानियोज्यत्वविशिष्टान्वये कार्यत्वान्वयो यथा भवितुमर्हति तथा स्वर्गकामो यजेतेत्यादौ वेदे यागादौ कार्यत्वान्वयो न भवितुमर्हति ।

तेत्यादौ स्वर्गकामनियोज्यकं यागविषयकं कार्यमिति प्राथमिको बोधः । सनियोज्यकं यागविषयकं स्थायि स्वर्गसाधनं कार्यमिति द्वितीयः । स्वर्गकामनियोज्यको यागः स्वर्गकामकार्य्य इति तृतीयः । स्वर्गकामो यागकर्तेति चतुर्थः । अहं स्वर्गकामोऽतो यागो मत्कृतिसाध्य इति पञ्चमः । न च प्रथम एव स्वर्गकामकार्य्यो याग इति बोधोऽस्तु, तथा च कार्यत्वे एव शक्तिर्न कार्ये इति वाच्यम् । (यागादिक्रियायां नियोज्यान्वयं विना कार्यत्वान्वयानुपपत्तेः ।)नियोज्यत्वं हि क्रियानिष्ठकाम्यसाधनताज्ञानाधीनमत्कार्यामितिबोधवत्त्वम् । तत्तु स्वर्गकामनाविशिष्टे योग्यता ऽवच्छेदकतया भासते ।

क्षणिकयागे काम्यस्वर्गसाधनत्वरूपयोग्यताऽभावेन तज्ज्ञानाधीनकार्यताज्ञानवत्त्वरूपनियोज्यत्वविशिष्टान्वयरूपाया योग्यतायाः कार्यत्वान्वयप्रयोजिकाया अभावात् । अतः अपूर्वरूपकार्ये विध्यर्थमङ्गीकृत्य स्वर्गकामनियोज्यकं यागविषयकं कार्यमिति प्रथमबोधोत्तरमपूर्वोपस्थितौ तत्र द्वितीयबोधेन स्थायित्वस्वर्गसाधनत्वयोग्रहे तद्द्वारा यागे स्वर्गसाधनत्वग्रहात् तत्र कार्यत्वबोध उपपादनीयः । अत एव च अतीन्द्रियस्य तस्य कार्यत्वोपपत्तिः । चतुर्थबोधस्तु प्रथमप्रतीतकृतेराश्रयान्वयलाभार्थम् । पञ्चमस्तु यागे असाधारणप्रवृत्त्युपपादनार्थमित्यलम्

घटेन जलमाहरेत्यत्र घटे छिद्रेतरत्ववत् । न च यागे स्वर्गसाधनत्वज्ञानं विनेदृशं नियोज्यत्वं भातुमर्हति । न वा यागे स्वर्गसाधनत्वं प्रथममेव शक्यं ज्ञातुम् । तद्धि साक्षात् परम्परया वा । नाद्यः । आशुविनाशिनो यागस्य कालान्तरभाविनि स्वर्गरूपफले साक्षादहेतुत्वात् । नान्त्यः । परम्पराघटकापूर्वानुपस्थितेः । अतो यागविषयकं कार्यमिति प्रथमबोधादपूर्वोपस्थितौ तद्द्वारा यागे स्वर्गसाधनत्वग्रहात् तत्र कार्यत्वबोध इत्युक्तम् । नियोज्यत्वं च पदानुपस्थितमपि योग्यतया शाब्दबोधे भासते द्वारमित्यत्र पिधेहीतिवत् ।

प्रवर्तकज्ञानविषयो विधिरिति नैयायिकाः । प्रवर्तकं च कृतिसाध्यत्वेष्टसाधनत्वबलवदनिष्टाननुबन्धित्वानां ज्ञानम् । अतस्तेषु लिङ्शक्तित्रयम् । सुमेरुशृङ्गाहरणनिष्फलाचरणमधुविषसंपृक्तान्नभोजनेषु प्रवृत्तिवारणाय यथासंख्यं त्रयाणामेव ज्ञानं प्रवर्तकम् । यत्तु समुदिते शक्तिरेकैवेति । तन्न । विशेष्यविशेषणभावे विनिगमकाभावेन त्रिष्वेव पृथक्शक्तेः । एवञ्च स्वर्गकामो यजेतेत्यादौ स्वर्गकामीयो यागः कृतिसाध्यः इष्टसाधनं बलवदनिष्टाननु-

बन्धीचेति बोध इत्येके ।

वस्तुतो नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयस्याव्युत्पन्नतया तादृशयागानुकूलकृतिमान् स्वर्गकाम इत्येव बोधः । कृतिसाध्यत्वं च प्रवृत्तिसाध्यत्वम् । अतो न समुद्रतरणादौ प्रवृत्तिः । इष्टसाधनत्वं चेष्टनिष्ठसाध्यतानिरूपकत्वमतो न तृप्तस्य भोजने प्रवृत्तिः । बलवदनिष्टाननुबन्धित्वं तु स्वजन्येष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वम् । न हि सुखं दुःखैर्विना लभ्यते इति न्यायेन नान्तरीयकं किञ्चिद् दुःखमिष्टोत्पत्ताववश्यंभावि तदतिरिक्तदुःखराहित्यमेव तत्त्वम् ।

ब्राह्मणो न हन्तव्य इत्यादौ नञः कृतिसाध्यत्वेष्टसाधनत्वनिषेधे स्वारस्याभावात्तेन बलवदनिष्टाननुबन्धित्वनिषेधाद् ब्राह्मणवधो बलवदनिष्टजनक इत्यर्थः पर्य्यवस्यति । एतेन समुदिते लिङः शक्तिकल्पनमपास्तम् ॥

यद्यपि प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययस्येति व्युत्पत्त्या नञर्थे बलवदनिष्टाननुबन्धित्वान्वयोऽसम्भवी तथाप्यन्यथानुऽपपत्त्या एतदतिरिक्तस्थले एव सा व्युत्पत्तिः । अत एव

नातिरात्रे षोडशिनं गृह्णातीत्यादौ षोडशिग्रहणाभाव इष्टसाधनमिति बोध इति दीधितिकृतः । न हन्तव्य इत्यादौ हननाभावविषयकं कार्यमिति बोध इति गुरवः । ननु पचतीत्यादौ लडाद्यर्थवर्त्तमानत्वादेर्यत्ने एवान्वयान्न सा व्युत्पत्तिः । मैवम् । यत्र प्रत्ययत्वं तत्र प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्याप्तेः । यः प्रत्ययार्थः स प्रकृत्यर्थस्य विशेष्यतया भासते इति व्याप्तेश्च ॥

लेटस्तु यच्छब्दासमभिव्याहृतस्यैव विधिरर्थः । समिधो यजतीत्यादौ विधिप्रत्ययात् । देवांश्च याभिर्यजते ददाति च य एवं विद्वानमावास्यां यजते इत्यादौ तदप्रत्ययादिति ॥

लृङस्तु भूतत्वं क्रियातिपत्तिश्चार्थः । अतिपत्तिरनिष्पत्तिरापादनारूपा । सा च शक्या । सा चापादना तर्कः । तर्कत्वं च मानसत्वव्याप्यो जातिविशेषः । एधांश्चेदलप्स्यत ओदनमपक्ष्यत् इत्यादौ एधकर्मको भूतत्वेनापादनाविषयो यो लाभस्तदनुकूलकृतिमान् ओदनकर्मको भूतत्वेनापादनाविषयो यः पाकस्तदनुकूलकृतिमांश्चेति बोधः । भविष्यति क्रियातिपदनेऽपि लृङ् । यदि सुवृष्टि-

रभविष्यत् तदा सुभिक्षमभविष्यदितिप्रयोगदर्शनात् । भूतत्वभविष्यत्त्वयोर्बोधनियमस्तात्पर्यात् । यदि स्यादित्यादौ लिङोऽप्यापादनायां शक्तिः । यदि निर्वह्निः स्यात् तर्हि निर्धूमः स्यादित्यादौ तस्या एव प्रतीतेः । लाघवेन स्थानिनां वाचकत्वात् सङ्ख्यापि लकारार्थः ॥

इति लकारार्थनिर्णयः ॥

अथ कारकाणि निरूप्यन्ते ॥

कर्ता कर्म च करणं सम्प्रदानं तथैव च ।
अपादानाधिकरणमित्याहुः कारकाणि षट् ॥

तत्र क्रियानिष्पादकत्वं कारकत्वम् । तच्च कर्त्रादीनां षण्णामपि । तत्र प्रकृतधातुवाच्यव्यापाराश्रयत्वं कर्तृत्वम् ।

धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते ।

इति हर्युक्तेः । अन्यकारकनिष्ठो व्यापारस्तु न प्रकृतधातुवाच्यः । यथा वह्निना पचतीत्यत्र वह्निनिष्ठः प्रज्वलनादिः । अन्यकारकनिष्ठव्यापाराश्रयस्य कर्तृत्ववारणाय धातुवाच्येति । तत्रोक्ते तु कारकमात्रे प्रथमैव । तिङ्समानाधिकरणे प्रथमा अभिहिते प्रथमेति वार्तिकद्वयात् । सूत्रमते तु कर्तृ-

कर्माद्यर्थकप्रत्ययेन कर्त्रादेरुक्तत्वात् प्रथमायाः प्रातिपदिकार्थ एवार्थः । तस्य चाख्यातार्थकर्त्रादिनाऽभेदान्वयेन प्रथमार्थस्य कारकत्वम् । अत एवाख्यातार्थद्वारकक्रियान्वयात् *तदर्थस्य क्रियाजनक-

*ननु परम्परया क्रियान्वितस्य कारकत्वे राज्ञः पुरुषमानयेत्यादौ राजादीनामपि कारकत्वापत्तिः । न च क्रियानिष्ठविषयताविशिष्टविषयताश्रयत्वं कारकत्वम्—विषयतावै, साक्षात् परम्परया वा स्वनिरूपितत्वं, स्वनिरूपितविषयतासामानाधिकरण्यम् एतदुभयसम्बन्धेन—तथाच राजनिष्ठविषयतायाः परम्परया क्रियाविषयतानिरूपितत्वेऽपि क्रियाविषयतानिरूपितविषयतासामानाधिकरण्याभावान्न राज्ञः कारकत्वापत्तिरिति वाच्यम्। सुन्दरस्य राज्ञः पुरुषमानयेत्यादौ सुन्दरपदार्थस्य परम्परया क्रियाविषयतानिरूपितराजपदार्थनिष्ठविषयतासमानाधिकरणसुन्दरत्वावच्छिन्नविषयताश्रयत्वेन कारकत्वापत्तेः । साक्षात् क्रियाविषयतानिरूपितविषयतासामानाधिकरण्यनियमेऽपि चैत्रेण स्वस्य पुत्रो दृश्यते इत्यत्र चैत्रस्य स्वपदार्थत्वेनापि कारकत्वापत्तिः, सुन्दरश्चैत्रो गच्छतीत्यादौ सुन्दरपदार्थस्य कारकत्वानापत्तिश्चेति चेन्न । कारकत्वव्याप्यकर्तृत्वकर्मत्वादिसम्बन्धेतरसम्बन्धावाटितपरम्परया क्रियाविषयतानिरूपितविषयताश्रयस्यैव कारकत्वस्वीकारात् । चैत्रो गच्छतीत्यादौ आख्यातार्थाश्रये चैत्र-

त्वादस्याः कारकविभक्तित्वेन भाष्ये व्यवहारः । चैत्रो भवतीत्यत्र एकत्वावच्छिन्नचैत्राभिन्नकर्तृकं भवनमिति बोधः । आख्यातकृदादिना कर्त्रादेरभिधानेऽपि प्रथमयाऽनुद्भूतकर्तृत्वादिशक्तिः प्रतिपाद्यते इति तात्पर्यम् । कर्माख्याते तु चैत्रेण ग्रामो गम्यते इत्यत्र चैत्रकर्तृकव्यापारजन्य एकत्वावच्छिन्नग्रामाभिन्नकर्मनिष्ठः संयोग इति बोधः । सम्बोधनप्रथमार्थस्यापि अनुवाद्यत्वेनोद्देश्यतया युष्मदर्थाभेदेन *विधेयक्रियायामन्वयात् क्रियाजनकत्वरूपं

स्य विशेषणत्वेऽपि अभेदस्य सम्बन्धत्वाभावेन तस्य सम्बन्धानवच्छिन्नतया तद्घटितपरम्परायाः कर्मत्वादिसम्बन्धेतरसम्बन्धाघटितत्वात्कारकत्वम् । चैत्रेण स्वस्य पुत्रो दृश्यते इत्यादौ तु स्वपदार्थस्य पुत्रपदार्थे निरूपितत्वसम्बन्धेन विशेषणत्वात् तद्घटितपरम्परायाः कर्तृत्वादिसम्बन्धेतरसम्बन्धघटितत्वत्वान्न कारकत्वम् । कटादेः अधिकरणस्यापि परम्परया क्रियान्वयेऽपि तद्घटितपरम्परायाः कर्तृत्वादीतरसम्बन्धाघटितत्वान्न कारकत्वानुपपत्तिरिति दिक् ।

*विधेयक्रियायामिति । "सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः । प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते" ॥ इति हर्युक्तेः विधेयक्रियायामेव सम्बोधनप्रथमान्तार्थान्वयलाभात् प्रवृत्तिनिवृत्त्योश्च

तत्फलत्वात् प्रवर्तनादियिषयक्रियायामेव तदन्वयः । अत एव व्रजानि देवदत्तेत्यादौ जानीहीत्यादिः शेष आवश्यकः । अस्मत्पदार्थकर्तृकव्रजनस्य देवदत्तोद्देश्यकप्रवर्तनाविषयत्वाभावात् । विधेयक्रियायामन्वयोऽपि लोडर्थप्रवर्तनान्वयद्वारकः । प्रवर्तनायामुद्देश्यतानिरूपकत्वसम्बन्धेन प्रकृत्यर्थान्वयः । तस्याश्च विषयतासम्बन्धेन धात्वर्थे । अभिमुखीभावमात्रसंबोधनस्य प्रकृत्यर्थे एवान्वयः । अभिमुखीभावश्च प्रयोक्तृवचनार्थज्ञानायादरवैशिष्ट्येनावस्थानम् । अयमेव प्रयोत्क्रिच्छाविषयप्रकृतवाक्यार्थविषयकबोधानुकूलो व्यापारः । तदाश्रयत्वं सम्बोध्यत्वम् । एतद्व्यापारानुकूलस्य सम्बोधनविभक्त्यन्तशब्दप्रयोगरूपप्रयोक्तृव्यापारस्येतरनैरपेक्ष्येणैव प्रतीतेस्तस्य न वाक्यार्थत्वम् । अभिमुखीभावस्यापि प्रातिपदिकार्थत्वमेव । तथाच राम मां पाहीत्यादौ अभिमुखीभवद्रामाद्युद्देश्यकप्रवर्तनाविषयो मत्कर्मकं रक्षणमिति बोधः । राम देवदत्तं मा पाहीत्यादौ च देवदत्तरक्षणं रामोद्देश्यकनिवर्त्तनाविषय इति बोधः । व्रजानि देवदत्तेत्यादौ जानीहीत्यध्याहारस्वीकारादेव सम्बोधनस्य कर्तृत्वव्यवहारो वृद्धोक्तः संगच्छते । अन्यथा व्रजनक्रियाकर्तृत्वस्याभावात् तत्र स दुरुपपादः । अस्माकं तु सूपपादः । तस्यैव त्वंपदार्थत्वेन अध्याहृतक्रियाकर्तृत्वात् । अतएवच तिङ्समानाधिकरणे प्रथमेति वार्तिकमते प्रथमा सिध्यति । तिङ्समानाधिकरणयुष्मत्पदसमानाधिकरणत्वात् । तदू ध्वनयन्नाह ।

कारकत्वम् । देवदत्त त्वं गच्छेत्यादौ अभिमुखीभवद्देवदत्ताभिन्नयुष्मदर्थोद्देश्यकप्रवर्तनादिविषयो गमनमिति बोधः । अत एव—

आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा ।
यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः ॥

इत्यभियुक्तोक्तं—

सुपां कर्मादयोऽप्यर्थाः सङ्ख्या चैव तथा तिङाम् ।

इति भाष्यं च सङ्गच्छते । अनुक्तकर्त्रादिषु तृतीयादयो विभक्तयः, अनभिहिताधिकारे तासां विधानादित्यन्यत्र विस्तरः ॥

ननु क्रियानिमित्तत्वं कारकत्वमिति स्वीकार्यमिति चेन्न । चैत्रस्य तण्डुलं पचतीत्यत्र सम्बन्धिनि

अभिमुखीभवद्देवदत्ताभिन्नयुष्मदर्थेति । अत्र च श्रूयमाणपदवृत्त्यैव बोधस्वीकारात् देवदत्तपदेनैव लक्षणया देवदत्तोद्देश्यकप्रवर्तनाविषयज्ञानरूपवाक्यार्थबोधनात् एकतिङ् वाक्यमिति परिभाषितं वाक्यलक्षणमपि समन्वेतीति आमन्त्रितनिघातसिद्धिः । एतेन अध्याहृतक्रियायामन्वये व्रजानीत्यनेनैकवाक्यत्वाभावान्निघातो न स्यादित्यपास्तम् । नद्यास्तिष्ठति कूले इत्यादाविव परम्परया व्रजानीत्यनेनान्वयस्य अध्याहृतक्रियान्वयेऽपि सत्त्वेनैकवाक्यत्वस्य सुलभत्वाच्चेति दिक् ॥

चैत्रादावतिव्याप्तेः । अनुमत्यादिप्रकाशनद्वारा सम्प्रदानादेरिव तण्डुलादिद्वारा सम्बन्धिनोऽपि क्रियानिमित्तत्वात् । किन्तु क्रियाऽन्वितविभक्त्यर्थान्वितत्वं क्रियानिर्वर्त्तकत्वं वा कारकत्वम् । विशेष्यतया क्रिया सुप्तिङन्यतरविभक्त्यर्थेऽन्वेति । स च विशेष्यतयैव चैत्रघटादौ । षष्ठ्यर्थस्य तण्डुलादिनामार्थान्विततया क्रियाऽनन्वितत्वात् । अत एव षष्ठ्यर्थस्योपपदविभक्त्यर्थस्य च न कारकत्वं क्रियान्वयाभावादिति शाब्दिकाः । उपपदविभक्तीनामपि सम्बन्ध एवार्थः । चैत्रस्य पचतीत्यादावपि तण्डुलादिपदाध्याहारेणैव बोधः । षष्ठ्यर्थसम्बन्धस्य नामार्थेनैव क्रियायाः कर्मत्वादिनैव साकाङ्क्षत्वेन सम्बन्धक्रिययोर्निराकाङ्क्षत्वात् ।

यत्तु कारकान्तराप्रयोज्यत्वे सति कारकचक्रप्रयोजकत्वं कर्तृत्वमिति । तन्न । स्थाली पचति असिश्छिनत्तीत्यादौ स्थाल्यादेः कारकचक्राप्रयोजकत्वात्कारकान्तरप्रयोज्यत्वाच्च तत्त्वं न स्यादित्यलम् ।

कर्मत्वं च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वम् । इदमेव कर्मलक्षणे ईप्सिततमत्वम् । गां पयो दोग्धीत्यादौ प-

योवृत्तिर्यो विभागस्तदनुकूलो व्यापारो गोवृत्तिः तदनुकूलश्च गोपवृत्तिः । अत्र पयसः कर्मत्वसिद्धये प्रयोज्यत्वनिवेशः । जन्यत्वनिवेशे तन्न स्यात् । प्रयागात्काशीं गच्छतीत्यत्र प्रयागस्य कर्मत्ववारणाय प्रकृतयात्वर्थफलेति । नहि विभागः प्रकृतयात्वर्थः किन्तु नान्तरीयकतया गमने उत्पद्यते । प्रयागस्य फलतावच्छेदकसम्बन्धेन* फलाश्रयत्वेनानुद्देश्यत्वाच्च ॥

---

* फलस्य व्यापारे स्वानुकूलत्वं-स्वेच्छाधीनेच्छाविषयत्वम्—यदुभयसम्बन्धेनान्वयः । तादृशसम्बन्धघटकेच्छीयविषयतावच्छेदकश्च सम्बन्धः फलतावच्छेदकः । तथा च तण्डुलं पचतीत्यादौ "समवायेन विक्लित्त्याश्रयस्तण्डुलो भवतु" इत्यारकेच्छायाः कर्तृनिष्ठत्वेन तादृशेच्छीयफलनिष्ठविषयतावच्छेदकत्वस्य समवाये एव सत्त्वेन तत्संबन्धेन फलाश्रयस्यैव कर्मत्वं, नतु कालिकादिना फलाश्रयस्य । तत्संबन्धस्य निरुक्तेच्छीयविषयतावच्छेदकत्वाभावात् । एवं ग्रामाद्विभजते इत्यादौ विभागसमानाधिकरणव्यापारार्थकोवपूर्वकभजधातुयोगे ग्रामादेर्न कर्मत्वम् । तस्य प्रकृतयात्वर्थव्यापारप्रयोज्यविभागरूपफलाश्रयत्वेऽपि "अनुयोगित्वेन विभागाश्रयोऽहं भवानि' इत्याकारकेच्छाया एव तत्र कर्तृनिष्ठायाः प्रतीयमानत्वेन अनुयोगित्वस्यैवेच्छीयविषयतावच्छेदकत्वेन तेन सम्बन्धेन

ननु प्रकृतधात्वर्थग्रहणेनैवात्र वारणादुद्देश्यत्वनिवेशः किमर्थ इति चेन्न । तस्यासाधारणं प्रयोजनं काशीं गच्छन्पथि मृत इति काश्याः फलाश्रयत्वाभावेऽपि फलाश्रयत्वेनोद्देश्यत्वसत्त्वात्कर्मत्वम् । ननु काशीं गच्छति चैत्रे चैत्रः काशीं

विभागरूपफलाश्रयत्वाभावात् । ग्रामं त्यजतीत्यादौ त्यजधातुयोगे तु ग्रामादेः कर्मत्वं भवत्येव । तत्र त्यजधातुना कर्तृव्यापारव्यधिकरणविभागस्यैव प्रतीत्या "प्रतियोगित्वेन विभागविशिष्टो ग्रामो भवतु"इत्याकारकेच्छाया एव तत्समभिव्याहारे प्रतीत्या च प्रतियोगित्वस्यैवेच्छीयविषयतावच्छेदकत्वेन तत्संबन्धेन फलाश्रयत्वस्य सत्त्वात् । एवं च प्रयागात् काशीं गच्छति इत्यत्र नवीनमते पञ्चम्युपपत्तये विभागस्य धात्वर्थत्वेऽपि व्यापारसमानाधिकरणस्यैव विभागस्य प्रतीत्या अनुयोगित्वस्यैव फलतावच्छेदकत्वात्तेन सम्बन्धेन फलाश्रयत्वेन प्रयागस्यानुद्देश्यत्वान्न कर्मत्वमिति भावः । गमधात्वादिसमभिव्याहारेऽपि विभागस्य धात्वर्थत्वं ध्रुवमपाये इति सूत्रे शब्देन्दुशेखरे स्पष्टमभिहितमिति तत एवावगन्तव्यम् । जन्यतावच्छेदकस्य, प्रकारतावच्छेदकस्य वा फलतावच्छेदकसंबन्धत्वमिति तु न युक्तम् । तथासति ग्रामं त्यजति ग्रामाद्विभजते इत्यादौ समवायस्यैवाविशेषेण फलतावच्छेदकत्वादुभयत्रापि ग्रामादेः कर्मत्वापत्तेरित्यन्यत्र विस्तरः ।

गच्छति न प्रयागमिति प्रयोगानुपपत्तिः, प्रयागस्य फलाश्रयत्वेनोद्देश्यत्वाभावादिति चेत्, उच्यते । कर्मलक्षणे ईप्सिततमपदस्य स्वार्थविशिष्टयोग्यताविशेषे लक्षणा । तथाच प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वयोग्यताविशेषशालित्वं कर्मत्वम् । तच्च प्रयागस्याप्यस्तीति कर्मत्वं तस्य सुलभम् । एतेन कार्यान्तरं कुर्वति चैत्रे किं ग्रामं गच्छति अथ वा ओदनं पचतीति प्रश्ने न ग्रामं गच्छति नौदनं पचतीत्यादिप्रयोगा व्याख्याताः । यत्र तु ताडनादिना पराधीनतया विषभोजनादिकं तत्र विषादि तादृशफलाश्रयत्वेनोद्देश्यमेव । अत एव "आतश्च विषमीप्सितं यद्भक्षयति ताडनात्" इति भाष्यं सङ्गच्छते । एतेन कशाभिहतः कारागारं गच्छतीति व्याख्यातम् । कालत्रये काशीगमनशून्ये चैत्रे काशीं गच्छति चैत्र इति वारणाय विशेष इति । काश्याः फलाश्रयत्वेनोद्देश्यत्वयोग्यतासत्त्वेऽपि तद्विशेषाभावान्न कर्मत्वत् । तद्विशेषश्च व्यापारसमकालिकस्तटस्थजनगम्यः । किञ्च ईदृशस्थले तद्विशेषवत्त्वेपि निषेध एवानुभवसिद्ध इति काशीं न गच्छतीति किमनुपपन्नम् ।

नन्वन्नं भक्षयन् विषं भुङ्क्ते ग्रामं गच्छंस्तृणं स्पृशतीत्यादौ विषतृणयोरुद्देश्यत्वाभावात् कथं कर्मत्वमिति चेच्छृणु । तथायुक्तमिति लक्षणान्तरात् । प्रकृतधात्वर्थप्रधानभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वमनीप्सितकर्मत्वमिति तदर्थात् । प्रयागात्काशीं गच्छतीत्यत्र प्रयागस्य कर्मत्ववारणाय प्रकृतधात्वर्थफलेति । द्वेष्योदासीनकर्मसंग्रहार्थमिदं लक्षणम् । दुहादीनां व्यापारद्वयार्थकत्वपक्षे अकथितश्चेति व्यर्थं, पूर्वेणैवेष्टसिद्धेः । एकव्यापारबोधकत्वपक्षे तु सम्बन्धषष्ठीबाधनार्थम् । तत्पक्षे कर्मसम्बन्धित्वे सति अपादानादिविशेषाविवक्षितत्वमकथितकर्मत्वमिति तृतीयलक्षणेन गां पयो दोग्धीत्यादौ गामित्यस्य कर्मत्वसिद्धिरित्यन्यत्र विस्तरः ।

यत्तु तार्किकाः । कर्मत्वं तु न करणव्यापार्यत्वं, तद्धि करणजन्यव्यापारवत्त्वम् । दात्रेण धान्यं लुनातीत्यादौ हस्तादिकरणजन्यव्यापारवति दात्रादावतिव्याप्तेः । नापि क्रियाजन्यफलशालित्वं तत् । चैत्रश्चैत्रं गच्छतीत्यापत्तेः । संयोगरूपफलस्योभयकर्मकर्तृनिष्ठत्वात् । नापि परसमवेतक्रियाजन्यफलशालित्वं तत् । गमिपत्योः पूर्वस्मिन्देशे त्यजेश्चो-

त्तरस्मिन्देशे कर्मत्वप्रसङ्गात् । नदी वर्धतइत्यादौ अवयवोपचयरूपवृद्धिक्रियायाः तीरप्राप्तिरूपफलाश्रये तीरे कर्मत्वापत्तेश्चेति ॥ अत्र ब्रूमः—धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वं, तादृशफलं च गमेस्संयोगस्त्यजेर्विभागः पतेरधोदेशसंयोगः । अधोदेशरूपकर्म्मणो धात्वर्थनिविष्टत्वादकर्मकत्वेन पर्ण वृक्षाद् भूमौ पतति । संयोगमात्रफलपक्षे वृक्षाद् भूमिं पततीति । ननु चतुर्थलक्षणेऽपि चैत्रश्चैत्रं गच्छतीत्यापत्तिस्तत्र हि धात्वर्थतावच्छेदकफलं संयोग इति चेन्न । लक्षणे व्यापारानधिकरणत्वे सतीतिविशेषणदानादित्याहुः ॥

तन्न । काशीं गच्छन् पथि मृत इत्यादौ काश्याः, काशीं गच्छति न प्रयागमित्यादौ प्रयागस्य, ग्रामं न गच्छतीत्यादौ ग्रामस्य च तादृशफलशालित्वाभावादेतस्य लक्षणस्यात्र सर्वत्राव्याप्तेः ।

ननु वृक्षं त्यजति खग इत्यत्र वृक्षस्य विभागरूपफलाश्रयत्वेनापादानत्वमस्त्विति चेन्न । अत्र हि विभागः प्रकृतधात्वर्थः । यत्र च विभागो न प्रकृतधात्वर्थस्तद्विभागाश्रयस्यैवापादानत्वं, यथा वृक्षात्प-

ततीत्यादौ । यत्र च प्रकृतधात्वर्थौ *विभागस्तत्रोभयप्राप्तौ अपादानमुत्तराणि कारकाणि बाधन्ते इति भाष्ययुक्तेः कर्मत्वम् ॥ अनुक्ते कर्मणि षष्ठीद्वितीये, भारतस्य श्रवणं भारतं शृणोतीति यथा ॥

सकर्मकत्वं च फलव्यधिकरणव्यापारवाचकत्वम् । फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वम् । अद्य देवदत्तो भवति उत्पद्यत इत्यर्थः । अत्रोत्पत्तिरूपं फलं बहिर्निस्सरणं च व्यापारः देवदत्तनिष्ठ एव । व्यापारमात्रवाचकत्वं वाऽकर्मकत्वम् । अस्ति भवति विद्यते वर्तत इत्यादिधातुषु फलस्य सर्वैर्दुर्विज्ञेयत्वात् । सत्ता हि स्थितिरूपो व्यापारविशेषः । देवदत्तोऽस्तीत्यादौ देवदत्तकर्तृका सत्तैव बोधाच्च । फलव्यापारयोर्धातुर्वाचक इति तु बाहुल्याभिप्रायेणेति दिक् ।

स्वनिष्ठव्यापाराव्यवधानेन फलनिष्पादकत्वं करणत्वम् । इदमेव साधकतमत्वम् ।

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् । विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ॥

इति हर्युक्तेः । क्रियाया इत्यस्य फलात्मिका-

* फलतावच्छेदकसंबन्धेन च फलाश्रयत्वमिति शेषः ।

या इत्यर्थः । रामेण बाणेन हतो वालीत्यादौ धनुराकर्षणादेर्व्यापारस्य बाणव्यापारात्पूर्वमपि कर्तरि सत्त्वात् । रामाभिन्नकर्तृनिष्ठव्यापारप्रयोज्यो यो बाणनिष्ठो व्यापारस्तज्जन्यं यत् प्राणवियोगरूपं फलं तदाश्रयो वालीति बोधाच्च । रामो बाणेन वालिनं हन्तीत्यादौ कर्तृप्रत्यये बाणव्यापारजन्यो यो वालिनिष्ठः प्राणवियोगस्तदनुकूलो रामकर्तृको व्यापार इति बोधः । अर्थाद्रामव्यापारप्रयोज्यो बाणव्यापार इति पार्ष्णिको बोधः । कर्त्रादिपञ्चकारकाणां करणत्वनिवारणाय व्यापाराव्यवधानेनेति दिक् ।

*क्रियामात्रकर्मसम्बन्धाय क्रियायामुद्देश्यं यत् कारकं तत्त्वं सम्प्रदानत्वम् । यथा ब्राह्मणाय गां ददातीत्यादौ दानक्रियाकर्मीभूतगोसम्बन्धाय ब्राह्मणो दानक्रियोद्देश्यः । गोब्राह्मणयोः स्वस्वामिभावः सम्बन्धः, चैत्रो मैत्राय वार्ताः कथयतीत्यत्र मैत्रवार्तयोर्ज्ञेयज्ञातृभावः सम्बन्धश्च ।

यत्तु वृत्तिकाराः—सम्यक्प्रदीयते यस्मै तत्सम्प्र-

*अत्र मात्रशब्दः कात्स्न्र्ये । तथाच क्रियासामान्यस्य कर्मणा सम्बन्धायेत्यर्थः, नतु दानरूपाया एव । तेन चैत्रो मैत्राय वार्ताः कथयतीत्यादौ कथनादिसंग्रहः ।

दानमित्यन्वर्थसंज्ञेयम् । तथा च गोनिष्ठस्वस्वत्वनिवृत्तिसमानाधिकरणपरस्वत्वोत्पत्त्यनुकूलव्यापाररूपक्रियोद्देश्यस्य ब्राह्मणादेरेव सम्प्रदानत्वम् । पुनर्ग्रहणाय रजकस्य वस्त्रदाने रजकस्य वस्त्रं ददातीति सम्बन्धसामान्ये षष्ठ्येवेत्याहुः ॥

तन्न । खण्डिकोपाध्यायः शिष्याय चपेटां ददातीतिभाष्यविरोधात् । कर्मणा यमभिप्रैतीतिसूत्रव्याख्यावसरे भाष्यकृता ऽन्वर्थसंज्ञाया अस्वीकाराच्च । अत एव—

तदाचक्ष्वासुरेन्द्राय स च युक्तङ्करोतु यत् ।

इति सप्तशतीश्लोकः सङ्गच्छते । तस्माद्रजकाय वस्त्रं ददातीत्यादि भवत्येव । अत्राधीनीकरणेऽर्थे ददातिः । चपेटां ददातीत्यत्र न्यसनेऽर्थे इति ।

सम्प्रदानचतुर्थ्यर्थ उद्देश्यः । तथा च ब्राह्मणोद्देश्यकं गोकर्मकं दानमिति बोधो मैत्रोद्देश्यकं वार्ताकर्मकं कथनमिति च । अकर्मकक्रियोद्देश्यत्वं सम्प्रदानत्वमिति लक्षणान्तरम् । यथा पत्ये शेते इत्यादि । पत्युद्देश्यकं नायिकाकर्तृकं शयनमिति बोधः ।

ननु दानादीनां तदर्थत्वात्तादर्थ्ये चतुर्थ्यैव सिद्धौ किं कर्मणा यमिति सम्प्रदानसंज्ञया, चतुर्थी

सम्प्रदाने इति सूत्रं तु रुच्यर्थानामिति विषये चतुर्थ्यर्थमिति चेन्न । दानकर्मणो गवादेर्ब्राह्मणार्थत्वेऽपि दानक्रियायाः परलोकार्थत्वात् । अत एव तादर्थ्यचतुर्थ्या दानकर्मणो गवादेः सम्प्रदानार्थत्वेऽपि दानक्रियायास्तदर्थत्वाभावेन चतुर्थ्यन्तार्थस्य दानक्रियायामन्वयानापत्त्या कारकत्वानापत्तिरिति हेलाराजः ॥

उपकार्योपकारकत्वसम्बन्धस्तादर्थ्यचतुर्थ्यर्थः । ब्राह्मणाय दधीत्यादौ ब्राह्मणोपकारकं दधीति बोधादिति दिक् ।

तत्तत्कर्तृसमवेततत्तत्क्रियाजन्यप्रकृतधात्ववाच्यविभागाश्रयत्वमपादानत्वम् । तदेवावधित्वम् । विभागश्च न वास्तवसम्बन्धपूर्वको वास्तव एव, किन्तु बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धिपरिकल्पितोऽपि । माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इत्यादौ बुद्धिपरिकल्पितापायाश्रयणेनैव भाष्ये पञ्चमीसाधनात् । अत एव चैत्रान्मैत्रः सुन्दर इत्यादिर्लोके प्रयोगः । *वृक्षं त्यजति खग इत्यादावपादानत्ववारणाय प्रकृतधात्ववाच्येति । परस्परस्मान्मेषावपसरत इत्यत्रापादानत्वाय तत्तत्कर्त्रिति । तत्तत्प-

* अत्रत्यं तत्त्वं पूर्वमुक्तम् ।

शुविशेषनिष्ठव्यापारजन्यविभागाश्रयस्तत्तत्पशुविशेषः। किं च मेषपदवाच्ययोः पशुविशेषयोः क्रियाश्रयत्वविवक्षा, परस्परपदवाच्ययोस्तयोस्तु विभागाश्रयत्वविवक्षेत्यौपाधिकस्तयोर्भेदः। शब्दस्वरूपोपाधिकृतभेदोऽप्यर्थे गृह्यते। यथाऽऽत्मानमात्मना वेत्तीत्यादौ शरीरावच्छिन्नं कर्तृ, अन्तःकरणावच्छिन्नं करणं, निरवच्छिन्नं निरीहं कर्म। एकस्यैव शब्दभेदाद्भेदः। शब्दालिङ्गितस्यैव सर्वत्र भानात्। तदाह—

न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥ इति।

ननु ह्येतदौपाधिकभेदमादायैवात्रापादानत्वे सिद्धे किं तत्तत्कर्तृसमवेतेत्यनेनेति चेन्न। पर्वतात्पततोऽश्वात् पतत्यश्ववाह इत्यादावश्वस्यापादानत्वाय तत्स्वीकारात्। ननु वृक्षात्पर्णं पततीत्यादौ तादृशफलाश्रयत्वात्पर्णस्याप्यपादानत्वं विभागस्य द्विष्ठत्वादिति चेन्न। परया कर्तृसंज्ञया बाधात्। अत एवापादानमुत्तराणि कारकाणि बाधन्ते इति भाष्यं सङ्गच्छते।

यत्तु केचिद्—गत्यनाविष्टत्वे सति तज्जन्यवि-

भागाश्रयत्वमपादानत्वमिति । तन्न । तत्तद्वाक्ये मेषाश्वयोरपादानत्वानापत्तेः । यदपि अपसरत इति सृधातुना गतिद्वयस्याप्युपादानादेकनिष्ठां गतिं प्रतीतरस्यापादानत्वमविरुद्धमिति । तन्न । क्रियाया एकत्वात् । अत एव "न वै तिङन्तान्येकशेषारम्भं प्रयोजयन्ति क्रियाया एकत्वात्" इति भाष्यं सङ्गच्छते ।

पञ्चम्यर्थोऽवधिः । वृक्षावधिकं पर्णकर्तृकं पतनमिति बोधः । पर्वतावधिकपतनाश्रयाभिन्नाश्वावधिकमश्ववाहकर्तृकं पतनमिति बोधः । परस्परमेषावधिकं द्वित्वावच्छिन्नमेषकर्तृकमपसरणमिति बोध इति दिक् ।

कर्तृकर्मद्वारकफलव्यापाराधारत्वमधिकरणत्वम् । यथा स्थाल्यामोदनं गृहे पचतीत्यादौ कर्मद्वारकविक्लित्तिरूपफलाधारः स्थाली, कर्तृद्वारकव्यापाराधारो गृहमिति । ननु साक्षात्क्रियाधारयोरोदनचैत्रयोराधिकरणत्वलब्धौ परम्परया तदाधारयोर्गृहस्थाल्योस्तत्संज्ञा त्वयुक्तेति चेन्न । परत्वात्कर्तृकर्मसंज्ञाभ्यां साक्षादाधारीभूते बाधात* । स्थाल्यधिकरणिका या

*बाधादिति । अतएव गृहं प्रविशति, मोक्षमिच्छति इत्यादौ न सप्तमी । मोक्षे इच्छाऽस्ति इति तु प्रत्य-

ओदननिष्ठा विक्लित्तिस्तदनुकूलो गृहाधिकरणको *मैत्रकर्तृको व्यापार इति बोधः ।

तच्चाधिकरणं त्रिधा । अभिव्यापकमौपश्लेषिकं-वैषयिकं चेति । तत्र सकलावयवव्याप्तौ व्यापकाधारत्वम् , यथा तिलेषु तैलमस्तीत्यादि । उप समीपे श्लेषः सम्बन्ध उपश्लेषस्तत्कृतमौपश्लेषिकम् । अत एव इको यणचीत्यादावौपश्लेषिकाधारे सप्तम्युक्ता

योपात्तेच्छारूपकर्तृद्वारा अस्तिक्रियायामन्वयाद्बोध्यम् । धातूपात्तेच्छायामन्वयेतु कर्मत्वात् कर्तृकर्मणोरिति षष्ठ्यैवेति दिक् ।

*अन्ये तु गृहाधिकरणको यश्चैत्रस्तत्कर्तृको व्यापारः, स्थाल्यधिकरणको य ओदनस्तन्निष्ठा या विक्लित्तिरित्येवम् अधिकरणकारकस्य कर्तृकर्मणोरेवान्वयः । अत एव अक्षशौण्ड इत्यादौ समासः सिध्यति । क्रियायामन्वये तु शौण्डादिना ऽसामर्थ्यात् समासो न स्यात् । शौण्डादिपदस्य आसक्तशौण्डादौ लक्षणया अन्तर्भूतासक्त्यादिक्रियाद्वारा सामर्थ्योपपादनं तु न युक्तम् । अक्षविषयकशौण्डत्ववान् इति बोधस्यैव ततो जननात्, विवक्षितत्वाच्च । अक्षशौण्डस्य धनमित्यादौ शौण्डादेरकर्तृत्वे तु अगत्या आसक्तशौण्डादौ लक्षणाश्रयणम् । तत्र शौण्डत्वस्य विधेयत्वेनाविवक्षितत्वाल्लक्षणाश्रयणेऽदोषात् । एतेन तत्र लक्षणास्वीकारेऽत्रापि लक्षणोचितेत्यपास्तम् इत्याहुः ।

संहितायामिति सूत्रे भाष्ये । तत्राजादिसामप्यीमेवेगादीनाम् । "यन्मासेऽतिक्रान्ते दीयते तस्य मास औपश्लेषिकमधिकरणम् मासिकं धान्यम्"इत्युक्तं " तत्र च दीयते " इति सूत्रे भाष्ये ।

यत्तु कटे आस्ते इत्यौपश्लेषिकोदाहरणमुक्तं कैयटेन, तदयुक्तम्, उक्तभाष्यविरोधात् । एतद्व्यतिरिक्तं वैषयिकमधिकरणम् । कटे आस्ते जले सन्ति मत्स्या इत्यादि* । अभिव्यापकातिरिक्तं गौणमधिकरणमिति बोध्यम् । सप्तम्यर्थोऽधिकरणमिति दिक् ।

ज्ञापकक्रियाश्रयवाचकादुत्पन्नायाः सत्सप्तम्यास्तु क्रियान्तरज्ञापकत्वमर्थः । तत्रानिर्णीतकालिकायाः+

---

* अग्रे वृक्षः कपिसंयोग्यस्तीत्यादौ अग्राधिकरणिका कपिसंयोगविशिष्टवृक्षकर्तृका सत्ता इति बोधे संयोगस्याव्याप्यवृत्तित्वात् वृक्षस्यावयवान्तरे मूलादौ कपिसंयोगविशिष्टवृक्षाभावप्रतीतेः कपिसंयोगे अग्रावच्छेद्यत्वं फलति । शिरसि मे देवना इत्यादि तु अवच्छेद्यावच्छेदकभावसम्बन्धस्याप्याधारतानियामकत्वादुपपादनीयम् ।

+अनिर्णीतकालिकाया इति । एवम् अनिर्णीतदेशिकाया निर्णीतदेशिका लक्षणम् । सति गुणे द्रव्यत्वमस्तीत्यादौ गुणनिष्ठसत्ताज्ञाप्या द्रव्यत्वनिष्ठा सत्तेति बोधः ।

क्रियाया निर्णीतकालिका ज्ञापिका । गोषु दुह्यमानासु गत इत्यादौ गोनिष्ठदोहनक्रियाज्ञापितगमनाश्रयश्चैत्र इति बोधः* ।

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः सम्बन्धः षष्ठ्या वाच्यः । तत्र राज्ञः पुरुष

ज्ञाप्यज्ञापकभावस्योत्सर्गतः सामानाधिकरण्ये सत्येव प्रतीतेः सामानाधिकरण्येन गुणविशिष्टं द्रव्यत्वमिति फलति । एतन्मूलक एव सत्सप्तम्या वैशिष्ट्यमर्थ इति तार्किकाणां प्रवादः । जले पीते तृषा शाम्यतीत्यादौ भूतार्थकप्रत्ययसमभिव्याहारे एतद्योगे हेतुत्वस्याप्याकाङ्क्षया प्रतीतेः अस्या निमित्तसप्तमीत्वव्यवहारोऽपि इति दिक् । ज्ञाप्यज्ञापकभावश्च तत्तच्छब्दबोध्यत्वेन विवक्षित एवैतच्छास्त्रप्रवृत्तौ निमित्तं, नतु वह्निधूमयोरिव व्यभिचारादर्शनसहकृतभूयोदर्शनाश्रयः । तथासति उदिते आदित्ये तमो नष्टामित्यादावेव स्यात्, गोषु दुह्यमानासु गत इत्यादौ कादाचित्कगमने विवक्षिते न स्यात् इति बोध्यम् ।

*दुह्यमानगोज्ञाप्यगमनाश्रय इति शब्दतो बोधे गोर्ज्ञापकत्वस्य विशेषणीभूतदोहनक्रियाद्वारैव पर्यवसितत्वात् गोनिष्ठदोहनक्रियाज्ञाप्यगमनाश्रयश्चैत्र इति बोधः फलितो भवति। एवमेव सति गुणे द्रव्यत्वामित्यादावपि बोध्यम् ।

इत्यादौ षष्ठीवाच्यमम्बन्धस्याश्रयाश्रयिभावसम्बन्धेन पुरुषेऽन्वयः । राजनिरूपितसम्बन्धवान् पुरुष इति बोधात् । ननु सम्बन्धस्योभयनिष्ठत्वात् पुरुषशब्दादपि षष्ठ्युत्पत्तिरस्त्विति चेन्न । राजसम्बन्धिपुरुष इति विवक्षायां राजशब्दादेव षष्ठी, प्रकृत्यर्थप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमिति व्युत्पत्त्यनुरोधात् । अन्यथा तद्विवक्षायां राजा पुरुषस्येति पुरुषशब्दात् षष्ठ्यां पुरुषार्थं प्रति षष्ठ्यर्थस्य विशेषणत्वापत्त्या व्युत्पत्तिभङ्गापत्तेः । अत एवाह—

भेद्यभेदकयोश्चैकसम्बन्धोऽन्योन्यमिष्यते ।
द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात् ॥

इति ।

भेदकः सम्बन्धनिरूपको, भेद्यः सम्बन्धाश्रयः ।

इति षट् कारकाणि ॥

अथ नामार्थः ॥ अत्र मीमांसकाः । शब्दानां जातौ शक्तिर्लाघवात् । व्यक्तीनामानन्त्येन तत्र शक्तौ गौरवात् ।

"नागृहीतविशेषणा बुद्धिर्विशेष्यमुपजायते"

इति न्यायस्य विशेषणे शक्तिर्विशेष्ये लक्षणेति तात्पर्यात् । किञ्च एकस्यां व्यक्तौ शक्त्युपदेशे व्य-

क्त्यन्तरे तदभावेन तद्बोधाप्रसङ्गात् । गामानयेत्यादावन्वयानुपपत्त्या तदाश्रयलक्षकत्वेन निर्वाहश्चेत्याहुः ।

तन्न । गोत्वमस्तीत्यर्थेऽन्वयानुपपत्त्यभावेन गौरस्तीति प्रयोगे व्यक्तिभानानापत्तेः । व्यक्तीनामानन्त्येऽपि शक्यतावच्छेदकजातेरुपलक्षणत्वेन तदैक्येन च तादृशजात्युपलक्षितव्यक्तौ शक्तिस्वीकारेणानन्तशक्तिकल्पनाविरहेणागौरवात् । लक्ष्यतावच्छेदकतीरत्वादिवत् शक्यतावच्छेदकस्यावाच्यत्वे दोषाभावात् । नागृहीतेति न्यायस्य विशेषणविशिष्टविशेष्यबोधे तात्पर्येऽपि त्वदुक्ततात्पर्ये मानाभावात् । जातेरुपलक्षकत्वेन तदाश्रयसकलव्यक्तिबोधेन व्यक्त्यन्तरबोधाप्रसङ्गभङ्गाच्च । तदाह—

आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम् ।
शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यतीति ॥

युक्तं ह्येतत् ।

शक्तिग्रहं व्याकरणोपमान-
कोशाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति
सान्निध्यतः सिद्धपदस्य वृद्धाः—

इत्येतेषु शक्तिग्राहकशिरोमणिर्व्यवहारो व्यक्तावेव शक्तिं ग्राहयति । गवादिपदेन लोके व्यक्तेरेव बोधात् ॥

वस्तुतस्तु "न ह्याकृतिपदार्थकस्य* द्रव्यं न पदार्थ" इति सरूपसूत्रभाष्याद्विशिष्टमेव वाच्यं तथैवानुभवात् । अनुभवसिद्धस्यापलापानर्हत्वाच्च ।

लिङ्गमपि नामार्थः । प्रत्ययानां द्योतकत्वात् । अन्यथा वायुपानदादिशब्देभ्य इयं तव वायिति स्त्रीत्वबोधानापत्तेः । अयमितिव्यवहारविषयत्वं पुंस्त्वम्, इयमितिव्यवहारविषयत्वं स्त्रीत्वम्, इदमितिव्यवहारविषयत्वं क्लीबत्वमिति विलक्षणं शास्त्रीयं स्त्रीपुन्नपुंसकत्वम् । अत एव खट्वादिशब्दवाच्यस्य स्तनकेशादिमत्त्वरूपलौकिकस्त्रीत्वाभावेऽपि तद्वाचकाद्दाबादिप्रत्ययः ।

सङ्ख्याऽपि नामार्थः । विभक्तीनां द्योतकत्वात् । अत एव आदिर्ञिटुडव इति सूत्रे आदिरिति बहुत्वे एकवचनम् । वाच्यत्वेऽन्वयव्यतिरेकाभ्यां जसं विना नामार्थबहुत्वप्रतीत्यभावापत्तेः ।

कारकमपि प्रातिपदिकार्थ इति पञ्चकं प्रातिप-

* मते इति शेषः ।

दिकार्थः । नन्वन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव तद्वाच्यमिति चेन्न । दधि तिष्ठति दधि पश्येत्यादौ कर्त्रादिकारकप्रतीतेः प्रत्ययं विनापि सिद्धत्वात् । न च लुप्तप्रत्ययस्मरणात्तत्प्रतीतिरिति वाच्यम् । प्रत्ययलोपमजानतोऽपि नामत एव तत्प्रतीतेः ।

विशेषणतया शब्दोऽपि शाब्दबोधे भासते । युधिष्ठिर आसीदित्यादौ युधिष्ठिरशब्दवाच्यः कश्चिदासीदिति बोधात् ।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥

इत्यभियुक्तोक्तेः ।

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा ।
तथैव सर्वशब्दानामेते पृथगवस्थिते ॥

विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यते ।

इति वाक्यपदीयाच्च । अत एव विष्णुमुच्चारयेत्यादावर्थोच्चारणासम्भवाच्छब्दप्रतीतिः । अत एवानुकरणेनानुकार्य्यस्वरूपप्रतीतिः । तथाहि स्वसदृशशब्दमात्रबोधतात्पर्यकोच्चारणविषयत्वमनुकरणत्वम् । स्वसदृशशब्दप्रतिपाद्यत्वे सति शब्दत्वमनुकार्यत्वम् । तत्रानुकार्यादनुकरणं भिद्यते इति

तयोर्भेदविवक्षायामनुकार्यस्वरूपप्रतिपादकत्वेनार्थक-त्वात् प्रातिपादिकत्वात्स्वादिविधिः । भेदपक्षज्ञापकः भुवो वुग्लुङ्लिटोरित्यादिनिर्देशः । अनुकार्यादनु-करणमभिन्नमित्यभेदविवक्षायां चार्थवत्त्वाभावान्न प्रातिपादिकत्वं, न वा पदत्वम् । अभेदपक्षज्ञापकस्तु भू सत्तायामित्यादिनिर्देशः । प्रातिपादिकत्वपदत्वा-भावेऽपि भू इत्यादि साधु भवत्येव ॥

नन्वपदं न प्रयुञ्जीतेति भाष्यादसाध्विदमिति चेन्न । अपदमित्यस्य हि अपरिनिष्ठितमित्यर्थः । प-रिनिष्ठित्वं च अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदका-नाक्रान्तत्वम् । देवदत्तो भवतीत्यादौ तिङ्ङतिङ इति निघाते जातेऽतिङन्तपदपरतिङन्तत्वरूपोद्देश्यताव-च्छेदकसत्त्वे अपरिनिष्ठितत्ववारणाय अप्रवृत्तेति । स्वरतीत्यादिविकल्पसूत्रस्य पाक्षिकप्रवृत्तौ सेद्धेत्या-दावसाधुत्ववारणाय नित्यविधीति । अभेदपक्षे तु अर्थवदिति सूत्रस्यार्थवत्त्वरूपोद्देश्यतावच्छेदका-नाक्रान्तत्वात् सूत्राप्रवृत्तावपि भू इत्यादि परिनि-ष्ठितम् । परिनिष्ठितसाधुशब्दौ पर्य्यायौ । नन्वनुक-रणस्यानुकार्यस्वरूपबोधकत्वस्याभावेन कथमनु-कार्यस्वरूपप्रतीतिरिति चेत्, सादृश्याख्यसम्बन्धे-

नेति गृहाण । यथा मैत्रसदृशपिण्डदर्शने मैत्रस्मरणम् एवं भू इत्याद्यनुकरणज्ञाने तादृशानुकार्यस्य ज्ञानमिति सङ्क्षेपः ।

अथ समासादिवृत्त्यर्थः । वृत्तिर्द्विधा । जहत्स्वार्थाऽजहत्स्वार्था च । अवयवार्थनिरपेक्षत्वे सति समुदायार्थबोधिकात्वं जहत्स्वार्थात्वम् । अवयवार्थसंवलितसमुदायार्थबोधिकात्वमजहत्स्वार्थात्वम् । रथन्तरं सामभेदः, शुश्रूषा सेवा इति पूर्वस्या उदाहरणम् । राजपुरुष इत्यादावन्त्या । समासादिपञ्चसु विशिष्ट एव शक्तिर्न त्ववयवे । रथन्तरं, सप्तपर्णः, शुश्रूषेत्यादौ अवयवार्थानुभवाभावात् । अत एव भाष्ये व्यपेक्षापक्षमुद्भाव्य अथैतस्मिन्व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स वक्तव्य इत्युक्तम् । धवखदिरौ, निष्कौशाम्बिः, गोरथो, घृतघटो, गुडधानाः, केशचूडः, सुवर्णालङ्कारो, द्विदशाः, सप्तपर्ण, इत्यादौ साहित्य-क्रान्त-युक्त-पूर्ण-मिश्र-सङ्घात-विकार-सुच्प्रत्ययलोप-वीप्साद्यर्था वाचनिका वाच्या इति तद्भाष्याशयः ॥

यत्तु व्यपेक्षावादिनो नैयायिकमीमांसकादयः—न समासे शक्तिः । राजपुरुष इत्यादौ राजपदादेः

सम्बन्धिनि लक्षणयैव राजसम्बन्धवदभिन्नः पुरुष इति बोधात् । अत एव राज्ञः पदार्थैकदेशत्वान्न तत्र ऋद्धस्येत्यादिविशेषणान्वयः । पदार्थः पदार्थेनान्वेति नतु पदार्थैकदेशेनेत्युक्तेः । सविशेषणानां वृत्तिर्न, वृत्तस्य च विशेषणयोगो नेत्युक्तेश्च । न वा घनश्यामो, निष्कौशाम्बिः, गोरथ इत्यादाविवादिप्रयोगापत्तिः । लक्षणयैवोक्तार्थतया उक्तार्थानामप्रयोग इति न्यायेन इवादीनामप्रयोगात् । नापि विभाषेति सूत्रमावश्यकं, लक्षणया राजसम्बन्ध्यभिन्न इति बुबोधयिषाय समासस्य, राजसम्बन्धवानिति बुबोधयिषायां विग्रहस्य च प्रयोगनियमसम्भवात् । नापि "शक्तिः पङ्कजशब्दवात्" इति पङ्कजशब्दप्रतिद्वन्द्विता शक्तिसाधिका । तत्रावयवशक्तिमजानतोऽपि ततो बोधात् । न च शक्त्यग्रहे लक्षणया तस्माद्विशिष्टार्थप्रत्ययः सम्भवति । अत एव राजपदादिशक्त्यग्रहे राजपुरुष इत्यादिषु न बोधः । न च चित्रगुरित्यादौ लक्षणासम्भवेऽप्यषष्ठ्यर्थबहुव्रीहौ लक्षणाया असम्भवः, बहुव्युत्पत्तिभङ्गापत्तेरिति वाच्यम् । प्राप्तोदक इत्यादौ उदकपदे एव लक्षणास्वीकारात् । पूर्वपदस्य यौगिकत्वेन तत्र लक्षणाया धातुप्रत्ययतदर्थज्ञानसाध्यतया विलम्बि-

तत्वात् । प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्त्यनुरोधाच्च । घटादिपदे चातिरिक्ता शक्तिः कल्प्यमाना प्रत्येकं वर्णेषु बोधकत्वेऽपि विशिष्टे कल्प्यते. विशिष्टस्यैव सङ्केतितत्वात् । प्रकृते चात्यन्तसन्निधानेन प्रत्ययान्वयसौलभ्यायोत्तरपदे एव लक्षणा कल्प्यतइति विशेषः । स्वीकृतं च घटादिपदेष्वपि चरमवर्णस्यैव वाचकत्वं मीमांसकंमन्यैरित्याहुः ।

अत्रोच्यते । समासे शक्त्यस्वीकारे विशिष्टस्यार्थवत्त्वाभावेन प्रातिपदिकत्वं न स्यात् । अत एवार्थवत्सूत्रे भाष्ये "अर्थवदिति किम्, अर्थवतां समुदायोऽनर्थकः "दश दाडिमानि षडपूपाः कुण्डमजाऽजिनम्"इति प्रत्युदाहृतम् । एवं च राजपुरुषपदयोस्त्वन्मते प्रत्येकमर्थवत्त्वेऽपि समुदायस्य दशदाडिमादिवदनर्थकत्वात्प्रातिपदिकत्वानापत्तेः । न च कृत्तद्धितेति सूत्रे समासग्रहणात् तत्संज्ञेति वाच्यम् । तस्य नियमार्थताया भाष्यकृतैव प्रतिपादितत्वात् । अन्यथासिद्धिं विना नियमायोगात् । अत एव राज्ञः पुरुषः देवदत्तः पचतीत्यादिवाक्यस्य *मूलकेनोपदंशमि-

* ननु राज्ञः पुरुष इत्यादिवाक्यस्य नैयायिकमते अर्थवत्त्वाभावादेव प्रातिपादिकत्वे न स्यात् अत आह ।

त्यादेश्च न प्रातिपदिकत्वम् । किञ्च समासे शक्त्यस्वीकारे शक्यसम्बन्धरूपलक्षणाया अप्यसम्भवेन लाक्षणिकार्थवत्त्वस्याप्यसम्भवेन सर्वथा प्रातिपदिकत्वाभाव एव निश्चितः स्यादिति स्वाद्यनुत्पत्तौ अपदं न प्रयुञ्जीतेति भाष्यात् समस्तप्रयोगविलयापत्तेः ॥

अथ तिप्तस्झीत्यतः तीत्यारभ्य ङ्योस्सुबिति पकारेण तिप्पत्याहारो भाष्यसिद्धः । तत्पर्युदासेनातिप्प्रातिपदिकमित्येव सूत्र्यताम्, ततः समासश्चेति सूत्रं नियमार्थमस्तु किं सूत्रद्वयेनेति । सुप्तिङन्तभिन्नं प्रातिपदिकमित्यर्थात् समासस्यापि सा स्यादिति समासश्चेत्यस्य नियमार्थत्वं सुलभमिति चेत्सत्यम् । प्रत्येकं वर्णेषु संज्ञावारणायार्थवदित्यस्यावश्यकत्वेन समासेऽव्याप्तिस्तदवस्थैव । तथा च प्रातिपदि-

---

मूलकेनोपदंशमिति । नैयायिकमते उत्तरसूत्रे अर्थवत्पदासंबन्धात् कृद्ग्रहणपरिभाषया कृदन्ततदादित्वादत्रातिप्रसङ्गो दुर्वार एवेति भावः । किं च बहुपटव इत्यस्य तद्धितान्तत्वाभावात्,परमगार्ग्यायण इत्यस्य तद्धितान्ततदादित्वाभावात्, कुमार्याः राज्ञा श्रितेन च युगपद् वृत्तौ राजकुमारीश्रित इत्यस्य समासत्वाभावाच्च उत्तरसूत्राप्राप्त्या अर्थवत्त्वाभावेन च पूर्वसूत्रस्याप्यप्राप्त्या प्रातिपदिकत्वानापत्तौ स्वादिविधानानापत्तिरिति दिक् ।

कसंज्ञारूपकार्यमेवार्थवत्त्वमनुमापयति। समासोऽर्थवान्प्रातिपदिकत्वात् यन्नार्थवत् तन्न प्रातिपदिकम् अभेदविवक्षापक्षे भू सत्तायामित्याद्यनुकरणवादिति ॥ यत्तु पदार्थः पदार्थेनेति, वृत्तस्य विशेषणयोगो नेति वचनद्वयेन ऋद्धस्येत्यादिविशेषणान्वयो न भवति, तत्तु समासे एकार्थीभावे स्वीकृतेऽवयवानां निरर्थकत्वेन विशेषणान्वयासम्भवात् फलितार्थपरपस्माकं, युष्माकं तु अपूर्ववाचनिकमिति गौरवमित्यग्रे वक्ष्यते ॥

यत्तु प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरिति । तन्न । उपकुम्भम् अर्धपिप्पलीत्यादौ पूर्वपदार्थे विभक्त्यर्थान्वयेन व्यभिचारात् । मम तु प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्तेः विशिष्टोत्तरमेव प्रत्ययोत्पत्तेर्विशिष्टस्यैव प्रकृतित्वात् विशिष्टस्यैवार्थवत्त्वाच्च न दोषः ।

किं च राजपुरुषादौ राजपदादेः सम्बन्धिनि सम्बन्धे वा लक्षणा। नाद्यः । राज्ञः पुरुष इतिविवरणविरोधात् । वृत्तिसमानार्थवाक्यस्यैव विग्रहत्वात् । अन्यथा तस्माच्छक्तिनिर्णयो न स्यात् । नान्त्यः । राजसम्बन्धरूपपुरुष इत्यन्वयप्रसङ्गात् ।

ननु तर्हि वैयाकरण इत्यस्य व्याकरणमधीते इति पाचक इत्यस्य पचतीति कथं विग्रहः। वृत्तिसमानार्थत्वाभावादित्यत आह—

आख्यातं तद्धितकृतोर्यत्किञ्चिद्बोधकं पदम्।
गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः इति॥

तद्धितकृतोर्यत्किञ्चिदर्थबोधकं विवरणमाख्यातं तिङन्तमिति यावत्, तत्र विवरणविवृण्वियमाणयोर्विशेष्यविशेषणभावविपर्ययो दृष्ट इति। कृदन्ततद्धितान्तयोराश्रयप्राधान्यम् आख्याते व्यापारस्येति बोध्यम्। ननु रथन्तरशब्दाद्रथिकस्यापि प्रत्ययः किन्न स्यादिति चेन्मैवम्। रूढियोगार्थमपहरतीति न्यायात्। ननु विशिष्टशक्तिस्वीकारे पङ्कजपदादवयवार्थप्रतीतिर्माभूत्, समुदायशक्त्यैव कमलपदवत् पुष्पविशेषप्रत्ययः स्यादिति चेन्न।

जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी।

इत्यभियुक्तोक्तेः अवयवार्थसंवलितसमुदायार्थे पङ्मे शक्तिस्वीकारात्। अत एव चतुर्विधः शब्दः- यथा रूढः, योगरूढः, यौगिकः, यौगिकरूढश्चेति। अवयवार्थमनपेक्ष्य समुदायशक्तिमात्रेणार्थबोधकत्वं रूढत्वम्—रथन्तरमित्यादौ। अवयवार्थसंवलितस-

मुदायशक्त्याऽर्थबोधकत्वं योगरूढत्वम्—पङ्कजमित्यत्र। अवयवशक्त्यैवार्थबोधकत्वं यौगिकत्वम्—पाचिकापाठिकेत्यादौ। अवयवशक्त्या समुदायशक्त्या चार्थबोधकत्वं यौगिकरूढत्वम्। मण्डपानकर्तृपरोऽपि गृहविशेषपरोऽपि मण्डपशब्द उदाहरणमिति विवेकः॥ व्यपेक्षापक्षे दूषणं शक्तिसाधकम्। हरिरप्याह—

समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्।
बहूनां वृत्तिधर्माणां वचनैरेव साधने॥
स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रित इति॥

पङ्कजशब्दे योगार्थस्वीकारे शैवालादेरपि प्रत्ययः स्यात्। वृत्तिधर्मा विशेषणलिङ्गसङ्ख्याद्ययोगादयः सविशेषणानां वृत्तिर्नेत्यादिवचनैरेव साध्या इति तत्तद्वचनस्वीकार एव गौरवम्। मम तु एकार्थीभावस्वीकारात् अवयवार्थाभावाद्विशेषणाद्ययोगो न्यायसिद्धः वचनं च न कर्तव्यं न्यायसिद्धं चेति लाघवम्। व्यपेक्षायां दूषणान्तरमाह—

चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम्।
कर्त्तव्यन्ते न्यायसिद्धं त्वस्माकन्तदिति स्थितिः॥

घटपटाविति द्वन्द्वे साहित्यद्योतकचकारनिषेधस्त्वया कर्तव्यः। आदिना घनश्याम इत्यादौ इवश-

ब्दस्य । मम तु स[illegible]त्याद्यवच्छिन्ने शक्तिस्वीकारादुक्तार्थानामप्रयोग इति न्यायात्तेषामप्रयोगः । बहुव्युत्पत्तिभञ्जनमिति । अषष्ठ्यर्थबहुव्रीहौ प्राप्तोदक इत्यादौ पृथक्शक्तिवादिनां मते प्राप्तिकर्मभिन्नमुदकमित्यादिबोधोत्तरं तत्सम्बन्धिग्रामलक्षणायामपि उदककर्तृकप्राप्तिकर्म ग्राम इत्यर्थालाभे प्राप्ते प्राप्तेतिक्तप्रत्ययस्य कर्त्रर्थकस्य कर्मार्थे लक्षणा, ततोऽपि समानविभक्तिकनामार्थयोरभेद एव संसर्ग इति व्युत्पत्त्या उदकाभिन्नं प्राप्तिकर्मेति स्यात् । उदकस्य कर्तृतया प्राप्तावन्वये तु नामार्थयोरभेदान्वयव्युत्पत्तिभञ्जनं स्यादिति तात्पर्यम् । नामार्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति विभक्त्यर्थोपस्थितेः कारणत्वमितिव्युत्पतिभञ्जनं च । मम तु पृथक्शक्त्यनङ्गीकारात् विशिष्टस्यैव विशिष्टार्थवाचकत्वात् नामार्थद्वयाभावात् न क्वचिदनुपपत्तिरित्यलम् ॥

श्रीशिवभट्टसुतसतीदेवीगर्भज-
नागेशभट्टकृता
परमलघुमञ्जूषा समाप्ता ॥

